सिद्धांतलक्षण जागदीश्या: कालीशंकरीति पद व्यवहृता पत्रिका - Edited by सीतराम शास्त्री द्रविड़.

Benares, 1951 Vikram era.

1081

7

Bill No. 5/07-08

162

2008-0622

Indira Gandhi National Centre for the Arts

॥ श्रीः ॥

# सिद्धांतलक्षणजागदीश्याः कालीशांकरीति पदव्य-वहृता पत्रिका ।

द्राविडोपाख्यसीतारामशास्त्रिणा संशोध्य ।

श्रीवाराणस्याम्
दशाश्वमेधघट्टस्थामरयन्त्रालये
मुद्रयित्वा प्रकाशमुपयापिता

पौष. कृ. १ गुरौ
सं. १९५१

Centre for the Arts

DATA ENTERED
Date. 11/07/08

SANS
181.4

KALANIDHI
Rare Book Collection
ACC No.: R-1622
IGNCA Date: 28-3-08

SANS
181.4
SID

Indira Gandhi National
Centre for the Arts

॥ श्रीः ॥

श्रीगणेशाय नमः ।

# अथ
# सिद्धान्तलक्षणजागदीश्याः कालीशांकरी
# प्रारभ्यते ।

ननु तत्तद्व्यक्तित्वावच्छिन्नाभावमादाय वह्निमान्धूमादित्यादावव्याप्तिवारणायाऽनवच्छेदकत्वानुसरणं कृतं दीधितिकृता तन्न संगच्छते रूपवान् पृथिवीत्वादित्यादावव्याप्तिवारणायावश्यमवच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य निवेश्यत्वादिति न चैतत्कल्पे प्रतियोगितावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशादेवाव्याप्तिवारणसम्भवे प्रतियोगितावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वं न निवेशनीयमिति वाच्यम्, विषयितासमवायान्यतरसम्बन्धेन रूपत्वविशिष्टस्य साध्यतायामात्मघटान्यतरत्वादित्यादौ समवायेन रूपत्वविशिष्टाभावं विषयितया रूपत्वविशिष्टाभावं चादायाव्याप्तिवारणार्थं साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकतापर्याप्त्यधिकरणं यद्रूपं तद्रूपपर्याप्तावच्छेदकताकसंसर्गतावच्छेदकत्वस्यावश्यं निवेशनीयत्वादितिचेन्न । यच्च वह्नित्वनिरूपितसमवायेन वह्नित्वविशिष्टस्य साध्यता तत्र साध्यता-

Indira Gandhi National
Centre for the Arts

वच्छेदकताघटकसंबन्धावच्छिन्नावच्छेदकत्वाप्रसिद्धया धूमादिहेताव्याप्तिवारणार्थं स्वानवच्छेदकसम्बन्धावच्छिन्नत्व स्वसामानाधिकरण्योभयसंबन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपकत्वस्य प्रतियोगितायां निवेशनीयत्वेन तादृशावच्छेदकत्वानिरूपकप्रतियोगिताकतत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिसंगतिः ॥

ननु यद्धर्मावच्छिन्नवाचकपदोत्तरमन्यादिपदश्रुतिरित्यादिव्युत्पत्त्या प्रतियोगितावच्छेदकावच्छिन्नं यद्भिन्नं भवति तेन समं सामानाधिकरण्यमित्येव वक्तुमुचितं, न व्युत्पत्तिवैचित्र्यं स्वीकरणीयमनुरोधाभावादिति चेन्न। प्रतियोगितावच्छेदकावच्छिन्नत्वावच्छेदेन यद्भिन्नत्वं तत्सामानाधिकरण्यं व्याप्तिरित्यवश्यं वाच्यमन्यथा प्रतियोगितावच्छेदकघटत्वावच्छिन्ने धूमभेदसत्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिः, न च तथाप्युभयभेदमादायातिव्याप्तिरिति वाच्यं, यद्भिन्नत्वपदेन यद्धर्मावच्छिन्नप्रतियोगिताकभेदस्य विवक्षितत्वात्, तथा च प्रमेयवान्वाच्यत्वादित्यत्र प्रमेयत्वावच्छिन्नप्रतियोगिताकभेदाप्रसिद्ध्याऽव्याप्तिरिति, ॥ प्रतियोग्यसमानाधिकरणेतिमूलोक्तलक्षणे तत्तद्व्यक्तित्वावच्छिन्नाभावमादायाव्याप्तिवारणायानवच्छेदकत्वानुसरणं, तन्न संगच्छते, स्वप्रतियोगिकत्वस्वसामानाधिकरण्योभयसम्बन्धेन साध्यविशिष्टान्यत्वस्याभावविशेषणात्, धूमवान्वह्नेरित्यत्रातिव्याप्तिवारणाय स्वसामानाधिकरण्यदलं, वन्हिमान्धूमादित्यादावभावाप्रसिद्धिवारणाय स्वप्रतियोगिकत्वदलं, न च यस्या महानसीयव्यक्तेः प्रतियोगिकत्वं तस्याः सामानाधिकरण्यविरहात् तत्तद्व्यक्तित्वावच्छिन्नाभावस्य लक्षण-

Indira Gandhi National
Centre for the Arts

टकत्वेन तमादायाव्याप्तितादवस्थ्यमिति. वाच्यं स्वप्रति-
योगिकत्वपदेन स्वाश्रयप्रतियोगिकत्वस्य स्वसामानाधिक-
रण्यपदेन च स्वाश्रयसामानाधिकरण्यस्योक्तत्वात् । न च
कपिसंयोग्येतद्वृक्षत्वादित्यादौ कपिसंयोगाभावस्य लक्षणा-
घटकत्वात् संयोगी सत्वादित्यादौ गुणावृत्तित्वाऽवच्छिन्ना-
भावमादायातिव्याप्तिवारणाच्च प्रतियोग्यसमानाधिकरणप-
दस्य वैयर्थ्यमितिवाच्यम् प्रमेयवान्वाच्यत्वादित्यादावभा-
वमात्रस्य प्रमेयत्वाश्रयप्रतियोगिकत्वप्रमेयत्वाश्रयसामाना-
धिकरण्ययोः सत्वेन लक्षणाघटकत्वादव्याप्तिवारणाय स-
मानाधिकरण्यघटकीभूतवृत्तित्वस्य विशेषणतया विवक्षि-
तत्वात्, कपिसंयोगाभाववान्सत्वादित्यत्राव्याप्तिवारणाय त-
त्सार्थक्यात् । नच प्रतियोगिवैयधिकरण्यस्य प्रतियोगितात्र-
च्छेदकसम्बन्धेन निवेश्यतया वन्हिमान्धूमादित्यादौ द्रव्य
त्वाभावाभावमादायाव्याप्त्यभावात् स्वप्रतियोगिकत्वस्य वै-
यर्थ्यमिति वाच्यं, बन्हिमान्धूमादित्यादौ पर्वतावृत्तित्वाव-
च्छिन्नाभावस्य पर्वतत्वात्मकतया तस्य विशेषणताविशेषसं-
बन्धावच्छिन्नवृत्तित्वविरहात् लक्षणघटकत्वेन तमादाया-
व्याप्तिवारणाय साध्यतावच्छेदकसंबन्धावच्छिन्नत्वस्य प्रति-
योगितायां निवेशनीयत्वात् तथाच साध्यतावच्छेदकस-
म्बन्धावच्छिन्नप्रतियोगिताकाभावमात्रस्य भावानात्मकतया
स्वाश्रयसामानाधिकरण्यसंबन्धेन साध्यतावच्छेदकविशिष्ट-
तया तदन्याभावाप्रसिद्ध्याऽव्याप्तिरिति। न च समवायेन
प्रमेयसाध्यकसत्वादिहेतौ साध्यतावच्छेदकसंबन्धावच्छिन्न-
प्रतियोगिताकतादृशाभावाप्रसिद्ध्याऽव्याप्तिवारणार्थं साध्य-
तावच्छेदकसंबन्धसामान्ये यादृशप्रतियोगितावच्छेदकाव-

Indira Gandhi National
Centre for the Arts

च्छिन्नप्रतियोगिकत्वेत्यादिसम्बन्धधर्मिकोभयाभावघटितलक्षणानुसारेण प्रतियोगितायां संबन्धविशेषस्यानिवेशनीयतया भावात्मकाभावमादायाव्याप्तिवारणसम्भवे तद्वैयर्थ्यं दुर्वारमिति वाच्यम् अभावो भेदत्वादित्यादौ तादृशाभावाप्रसिद्ध्याऽव्याप्तेर्दुर्वारत्वात् नैवं, घटत्वाभावपटत्वाभावान्यतरवान् द्रव्यत्वादित्यादौ घटत्वपटत्वस्वरूपाभावप्रतियोगितायाः सकलसाध्ये सत्वेनातिव्याप्तिरिति । न च तद्दोषवारणार्थमनवच्छेदकत्वानुसरणं क्रियतइति वाच्यं अभाववान्मेयत्वादित्यादौ घटत्वाभावाभावमादायाव्याप्तिरिति ॥

ननु साध्याधिकरणवृत्तित्वजगद्वृत्तिभिन्नत्वोभयाभावविशिष्टहेत्वधिकरणवृत्त्यभावप्रतियोगिताशून्यसाध्यसामानाधिकरण्यस्यैव सम्यक्तोऽनवच्छेदकत्वानुसरणं व्यर्थमिति, असम्भववारणाय जगद्वृत्तिभिन्नत्वविशेषणस्य व्यभिचारिण्यतिव्याप्तिवारणाय साध्यवद्वृत्तित्वस्य उभयाभावस्य प्रतियोगिकोटौ निवेशः । न च व्यधिकरणसम्बन्धेन साध्याभावस्य जगद्वृत्तितया तादृशाभावमादायैव व्यभिचारिण्यतिव्याप्तिसम्भवे साध्यवद्वृत्तित्वस्य वैयर्थ्यमिति वाच्यम् । समवायेन प्रमेयसाध्यकव्यभिचारिणि वाच्यत्वादिहेतावतिव्याप्तिवारणाय तदावश्यकत्वात्, साध्यवद्वृत्तित्वन्तु स्वप्रतियोगिमत्ताबुद्धिविरोधिताघटकसंबन्धेन बोध्यं तेन धूमवान्वह्नेरित्यादौ नातिव्याप्तिः; संयोगाभावस्य जगद्वृत्तितया उभयाभावसत्वेन तमादायाव्याप्तिवारणाय प्रतियोगिवैय्यधिकरण्यदलस्य सार्थक्यात् । तदर्थञ्च साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणो बोध्यः, प्रतियोगिता तु न सम्बन्धविशेषेण निवेशनीया तथाच वह्निमान्धूमादित्यादौ स्वरूपेण घटाभा-

वमादायलक्षणसमन्वयः । एवंसाध्यतावच्छेदकसम्बन्धे सामान्यधर्मिकोभयाभावघटितप्रतियोगिवैयधिकरण्यकल्पे च गगनाभावमादायैव लक्षणसमन्वयः, मैवं, संयोगी वृक्षत्वादित्यादावव्याप्तिः, सकलसंयोगस्यैव निरुक्तप्रतियोगिव्यधिकरणस्य केवलान्वयिनस्तत्तत्संयोगाभावस्य प्रतियोगित्वादिति कृतं पल्लवितेन । अथ स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बंधेन जगद्वृत्तिभिन्नत्वस्य तादृशसम्बंधेन साध्याधिकरणवृत्तित्वस्य च उभयाभाववान् यो हेत्वधिकरणवृत्त्यभावः तत्प्रतियोगिताशून्यसाध्यसामानाधिकरण्यस्योक्तौ नोक्तस्थलेऽव्याप्तिः, तत्तत्संयोगाभावस्य तादृशोभयाभाववत्त्वाभावादिति, अनुगमस्तु, स्वसमानकालीननिरवच्छिन्नविशेषणताविशेषसम्बन्धावच्छिन्नजगद्वृत्तित्वसम्बंधावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वस्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धावच्छिन्नसाध्याधिकरणवृत्तित्वोभयसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन यत्किंचिदभावविशिष्टहेत्वधिकरणवृत्तिर्योऽभावस्तत्प्रतियोगिताशून्यसाध्यसामानाधिकरण्यमिति समुदितार्थः, । मैवं, घटत्वाभावपटत्वाभावान्यतरवान् घटत्वपटत्वान्यतरत्वादित्यादौ कालिकसम्बन्धावच्छिन्नप्रतियोगिताकवाच्यत्वाभावः आत्मानुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकगगनाभावस्याभावेतदन्यतरस्य साध्यतायां मेयत्वादिहेतावव्याप्तिः, सर्वस्यैव साध्यस्य प्रत्येकाभावस्य निरुक्तलक्षणघटकतया तत्प्रतियोगित्वादिति ॥

अथ प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावभिन्नाभावप्रतियोगिसाध्यसामानाधिकरण्यमेव व्याप्तिरित्यस्यैव सम्यक्त्वे साध्यतावच्छेदकेत्यादिविशेषणं विफलं, न च हेतुसमानाधि-

Indira Gandhi National Centre for the Arts

करणाभावभिन्नकालिकसंबंधावच्छिन्नप्रतियोगिताकधूमाभाभावमादायधूमवान्वन्हेरित्यादावतिव्याप्तिरिति वाच्यं, साध्यतावच्छेदकसम्बन्धेन प्रतियोगिवैय्याधिकरण्यस्य विवक्षणेनैव तद्दोषवारणात्। न च प्रमेयवान्वाच्यत्वादित्यादावव्याप्तिरिति वाच्यं, तादृशाभावभिन्नसंयोगसम्बन्धावच्छिन्नप्रमेयाभावमादायैवाव्याप्तिविरहादिति चेदुच्यते। महानसीयवन्हिमान्धूमादित्यादावतिव्याप्तिस्तादृशोऽभावभिन्नोयः संयोगसम्बन्धावच्छिन्नवन्ह्यभावस्तत्प्रतियोगित्वस्य साध्ये सत्वादिति। न च तादृशाभावप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वस्य साध्यतावच्छेदके विवक्षणेनैतद्दोषवारणमिति वाच्यं तस्य लक्षणांतरत्वादिति धेयम्॥

यद्यपि कालिकादिसम्बन्धेन साध्याभावमादाय व्यभिचारिमात्रे दोषवारणाय प्रतियोगिवैय्यधिकरण्यं साध्यतावच्छेदकसंबन्धेनैव वाच्यं, तथा च विषयितासंबन्धेन धूमत्वविशिष्टाभावप्रतियोगितावच्छेदकावच्छिन्नस्य ज्ञानस्य साध्यतावच्छेदकीभूतसंयोगसम्बन्धेनाधिकरणाप्रसिद्ध्या तादृशाभावे प्रतियोगिवैय्यधिकरण्याभावेन प्रतियोगिव्यधिकरणाभावभिन्नत्वस्याक्षततया तादृशाभावप्रतियोगितावच्छेदकत्वस्य धूमत्वादौ सत्वेन धूमवान्वन्हेरित्यादावतिव्याप्तिः। तथापि साध्यतावच्छेदकताघटकसम्बन्धेन प्रतियोगितावच्छेदकत्वस्य विवक्षणीयत्वान्नकोपि दोषः। न च तथापि जातिमदभावस्य हेतुसमानाधिकरणाभावभिन्नतया तत्प्रतियोगितावच्छेदकस्य धूमत्वे सत्वेनातिव्याप्तिरिति वाच्यं तादृशप्रतियोगितावच्छेदकतायां निरवच्छिन्नत्वस्यापि निवेशनीयत्वादिति चेन्न। एवं तदात्मत्वप्रतियोगिकसमवा-

Indira Gandhi National
Centre for the Arts

येनात्मत्वसाधकज्ञानहेतुकव्यभिचारित्वमितिव्याप्तिस्तथाहि तादृशसमवायसम्बन्धेनात्मत्वाभावे प्रतियोगिवैयधिकरण्यस्य सत्त्वेऽपि व्यभिचारितया व्याप्यवृत्तिसाध्यकस्थलीयलक्षणस्याऽलक्ष्यत्वेन तत्र प्रतियोगिवैयधिकरण्याप्रवेशेन तदभावस्य हेतुसामानाधिकरण्याभावात्। हेतुसमानाधिकरणाभावभिन्नाभावतया तत्प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्त्वादव्यभिचारिण्युभयलक्षणस्यैवालक्ष्यत्वाल्लाघवासम्भवाच्चेति। यदिच व्याप्यवृत्त्यव्याप्यवृत्तिसाध्यकस्थलसमात्रएव साध्यतावच्छेदकसम्बंधावच्छिन्नसाधरतावच्छेदकावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेन यदभावप्रतियोग्यधिकरणत्वाभाववत्त्वं हेतुमतस्तदभावभिन्नाभावप्रतियोगितावच्छेदकत्वं साधरतावच्छेदके विवक्षणीय तथाच न कोऽपि दोष इति सूक्ष्ममीक्ष्यते तदा सुधीभिरेवात्र दोषोऽनुसन्धेय इति धेययम्॥

न च तथापि यद्रूपावच्छिन्नाधिकरणत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाधिकरणत्वं न भवति तत्तद्रूपावच्छिन्नसामानाधिकरण्यस्य विवक्षणेनैव सामञ्जस्ये कृतं साध्यतावच्छेदकतदितरेत्यादिविशेषणेनेति वाच्यम्॥ सामान्यधर्मावच्छिन्नाधिकरणत्वानभ्युपगन्तृमते वह्निमान्धूमादित्यादावव्याप्तिरिति दिक्॥

अथ यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणं हेत्वधिकरणं तादृशप्रतियोगिताभिन्नसाधरतावच्छेदकावच्छिन्नप्रतियोगिताश्रयसामानाधिकरण्यं व्याप्तिरित्यस्यैव सम्यक्त्वे साधरतावच्छेदकेत्यादि विफलमिति चेन्न धूमवदनुयोगिकसंयोगेन वह्नेः साधरत्वे वह्न्यधिकरणत्वादिहेतावव्याप्तेः, तादृशप्रतियोगिताभिन्ना या संयोगसंबंधावच्छिन्नवह्नि-

Indira Gandhi National Centre for the Arts

त्वावच्छिन्नप्रतियोगिता तदाश्रयसामानाधिकरण्यसत्वादिति धेयम् ॥

अथ साध्यतावच्छेदके प्रतियोगिव्यधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्यत् तदवच्छिन्नभेदकूटसामानाधिकरण्यविवक्षणेनैव सामंजस्ये कृतं साध्यतावच्छेदकेत्यादिविवक्षणेनेति। नच गगनवृत्तित्वविशिष्टवन्ह्यभावमादाय वन्हिमान्धूमादित्यादावव्याप्तिरिति वाच्यं साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वोयस्वरूपसम्बन्धेन प्रतियोगिनिरूपिताधिकरणत्वाभावस्य प्रतियोगिव्यधिकरणपदेन विवक्षितत्वात्, न च विषयितासंबंधेन प्रमेयस्य साध्यतायां तज्ज्ञानत्वादिहेतावव्याप्तिस्तादृशाभावाप्रसिद्धेरितिवाच्यं प्रतियोगिताव्याप्यनिरूपकत्वस्य विवक्षितत्वादिति ॥

एतेन प्रतियोगित्वसम्बन्धेन महानसीयवन्हिसाध्यकस्थले प्रत्येकेन महानसीयाद्यभावमादायाव्याप्तिरित्यपि प्रत्युक्तम्, एतादृशप्रतियोगिव्यधिकरणत्वस्य लक्षणघटकत्वात् प्रत्येकाभावे प्रतियोगिवैय्यधिकरण्याभावादिति धेयम् ॥

अथ विशिष्टाभावोभयाभावमादायासम्भवसम्भवे तत्तद्वृत्तित्वावच्छिन्नाभावमादायाव्याप्तिदानं संदर्भविरुद्धं कृतं जगदीशेनेति चेन्न तादात्म्येन गगनस्य साध्यतायां तद्वृत्तित्वादिहेतौ साध्यघटित विशिष्टाभावोभयाभावस्य प्रतियोगिवैय्यधिकरण्यविरहेण तत्र लक्षणगमनानुपसम्भव इति धेयम्,

नच महानसीयवन्हिर्नास्तीतिप्रतीतिसिद्धस्य हेतुनिष्ठाभावस्य प्रतियोगितावच्छेदकमेव वन्हित्वमित्यव्याप्तितादवस्थ्यमिति वाच्यम् साध्यतावच्छेदकतदितरोभयावच्छि-

Indira Gandhi National
Centre for the Arts

भिन्नाया एव प्रतियोगिताया अनवच्छेदकत्वस्य विवक्षित-
त्वादिति जगदीशः। साध्यतावच्छेदकेतरपदेन साध्यतावच्छे-
दकतावच्छेदकरूपेण स्वानवच्छिन्नप्रकारतावच्छेदकत्वं विव-
क्षणीयमतो न प्रमेयमवान्वाच्यत्वादित्यत्र स्वानवच्छिन्नप्रकार-
ताप्रसिद्ध्या तदितराप्रसिद्धिः, एवञ्च जातिमत्त्वान् भावत्वादि-
त्यत्रातिव्याप्तिस्तथाहि जातिमदभावीयप्रतियोगिताया जा-
तित्वरूपेण जात्यनवच्छिन्नघटवानितिज्ञानीयघटनिष्ठप्रकार-
तावच्छेदकं यद्घटत्वादिकं साध्यतावच्छेदकं यज्जातिमत्त्व
मेतदुभयनिष्ठावच्छेदकतानिरूपकत्वात् जातिमदभावो न
लक्षणघटकः किन्तु तत्तद्व्यक्तित्वावच्छिन्नाभावएव, तथाच त-
त्प्रतियोगितानवच्छेदकजातिमत्त्वं अत्रापि प्रत्येकाभावमादा
याव्याप्तिवारणेऽपि महानसीयवन्हि भिन्नवन्हित्ववत्वान्धूमा
दित्यत्रातिव्याप्तिर्दुर्धरा मैवं, साध्यतावच्छेदकतापर्याप्त्यनु-
योगितावच्छेदकीभूतधर्मविशिष्टधर्मावच्छिन्नानुयोगिताकप-
र्याप्तिकावच्छेदकत्वानिरूपिका या प्रतियोगिता तदनवच्छे-
दकत्वस्य विवक्षितत्वात्, वैशिष्ट्यञ्च स्वाभाववद्वृत्तित्वस्वसामा-
नाधिकरण्योभयसम्बन्धेन, तथाच वन्हिमान्धूमादित्यादौ म-
हानसीयवन्ह्यभावमादाय नाव्याप्तिस्तथाहि तदभावीयप्र-
तियोगितायाः साध्यतावच्छेदकतापर्याप्त्यनुयोगितावच्छेद-
कं यद्वन्हित्वनिष्ठैकत्वं तद्विशिष्टंमहानसीयत्ववन्हित्वनिष्ठद्वि-
त्वं तदवच्छिन्नानुयोगिताकपर्याप्तिकावच्छेदकतानिरूपक-
त्वात् जातिमत्त्वान्भावत्वादित्यादौ च नाव्याप्तिरितिध्येय-
म् ॥ वस्तुतस्तु स्वनिरूपितत्वस्वभिन्नप्रकृतानुमितिविधेयता
तावच्छेदकतापर्याप्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्ना-
नुयोगिताकपर्याप्तिकावच्छेदकतानिरूपकत्वोभयसम्बन्धेनाव

Indira Gandhi National
Centre for the Arts

च्छेदकताविशिष्टन्याया एव प्रतियोगिताया अनवच्छेदक-
त्वस्य साध्यतावच्छेदके विवक्षितत्वान्नकोऽपि दोषः ॥

वह्निमान्धूमादित्यादौ महानसीयवह्निवृत्तित्वविशिष्ट-
जातिमदभावमादायाव्याप्तिवारणायावच्छेदकतायां न-
रवच्छिन्नत्वं निवेशितं जगदीशेन, नचात्रमहानसीयव-
ह्निवृत्तित्वविशिष्टजातिमद्वह्निर्नास्तीतिप्रतीतिसिद्धाभावी-
यप्रतियोगिताया निरवच्छिन्नावच्छेदकत्वस्य वह्नित्वे स-
त्त्वादव्याप्तितादवस्थ्यमिति वाच्यं, अव्यावर्तकत्वेन तादृशप्र-
तीत्या वह्नित्वे निरवच्छिन्नावच्छेदकत्वानवगाहनात्, अथ-
वा सावच्छिन्नावच्छेदकताविशिष्टान्यत्वरूपं निरवच्छिन्नत्व
मत्र विवक्षितम्, वैशिष्ट्यं च स्वनिरूपकप्रतियोगित्वनिरूप-
कत्वस्वसामानाधिकरण्यैतदुभयसम्बन्धेन ग्राह्यं तथाच वह्नि-
त्वनिष्टनिरवच्छिन्नावच्छेदकत्वस्यापि तादृशसम्बन्धेन साव-
च्छिन्नावच्छेदकत्वविशिष्टतया नाव्याप्तिरिति भावः, वस्तुत-
स्तु, सावच्छिन्नावच्छेदकत्वानिरूपकत्वमेव निरवच्छिन्नत्वं
प्रतियोगितायां निरवच्छिन्नत्वं अतो न तादृशाभावप्रतियो-
गितालक्षणघटिका इति नाव्याप्तिरिति भावः ॥ नच साध्य-
तावच्छेदकतदितरोभयानवच्छिन्नत्वं व्यर्थं, महानसीयव-
ह्न्यभावप्रतियोगितायाः सावच्छिन्नावच्छेदकतानिरूपकत्वे-
न लक्षणाघटकत्वमिति वाच्यं, तार्णवह्न्यभावमादाय वह्नि
मान्धूमादित्यादावव्याप्तिप्रसंगात्, यद्यपि तादृशाभावप्रति-
योगिताया अवच्छेदकत्वं तार्णत्व एव स्वीक्रियते लाघवान्न तु
वह्नित्वे अव्यावर्तकत्वात्, तथापि कालोरजतमित्यादिप्रती-
त्या कालिकसम्बन्धेन जात्यादेः स्वरूपतोभानात् कालिकस-
म्बन्धेन गुणत्वविशिष्टस्य साध्यतायां द्रव्यत्वादिहेतौ कालिके-

Indira Gandhi National
Centre for the Arts

न गुणत्वविशिष्टस्य समवायेन रूपत्वविशिष्टस्य गुणत्ववद्रूप-स्याभावमादायाव्याप्तिवारणाय तत्सार्थक्यादिति ध्येयम् ॥

अत्रेयमापत्तिः, ननु व्यभिचारिमात्रस्य सर्वस्या निरुक्तो लक्ष्यतया शुद्धसाध्यतावच्छेदकस्थलीयनिरुक्तौ दण्डिमान्द्रव्यत्वादित्यादावतिव्याप्तिरितिचेन्न, हेतुमन्निष्ठाभावप्रतियोगितायां निरवच्छिन्नावच्छेदकत्वाभाववत्वे सति निरवच्छिन्नावच्छेदकताश्रयसाध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति सर्वं सुस्थितं ॥

ननु विशिष्टसाध्यतावच्छेदककस्थले हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकतायां साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वनिवेशेऽपि दण्डिमान्दण्डिसंयोगादित्यादौ तत्तद्व्यक्तित्वावच्छिन्नदंडनिष्ठावच्छेदकताकप्रतियोगिताकाभावमादायाव्याप्तिसम्भवे रूपत्वन्यूनवृत्तिजातिमत्वान् रूपादित्यादिस्थलान्तरानुधावनमनुचितं, नच साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नत्वनिवेश एव तात्पर्य्यमन्यथा जातिमत्वान्घटत्वादित्यादौ पटसमवेतत्वविशिष्टवान्नास्तीतिप्रतीतिसाक्षिकपटसमवेतत्ववैशिष्ट्यमात्रावच्छिन्नजातिनिष्ठावच्छेदकताकप्रतियोगिताकाभावमादायाव्याप्तितादवस्थ्यापातात्, तथाच तत्तद्व्यक्तित्वावच्छिन्नदंडनिष्ठावच्छेदकतायां साध्यतावच्छेदकेतरतद्व्यक्तित्वावच्छिन्नत्वेन तदभावस्य लक्षणाघटकत्वान्नाव्याप्तिरिति वाच्यम् । तथासति संयोगेन तद्व्यक्तिमतः कथंचित् सम्बन्धेन साध्यतायामव्याप्त्यापत्तेः, साध्यतावच्छेदकताघटकसंयोगसम्बन्धावच्छिन्नहेतुमन्निष्ठाभावीयप्रतियोगितावच्छेदकतायाः साध्यतावच्छेदकतावच्छेदकेतरधर्मावच्छिन्नत्वेन ताद्दशावच-

च्छेदकत्वाप्रसिद्धेः, जात्यखंडोपाध्यतिरिक्तस्य स्वरूपतोभाने मानाभावाद्रूपत्ववत्वान् रूपवान् वा न्पृथिवीत्वा दित्यादौ विषयितासंबंधेन रूपत्वविशिष्टाभावमादायाव्याप्तिवारणा-याावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिवेशस्यावश्यकत्वादितिचेन्न तत्राव्याप्तिवारणाय साध्य-तावच्छेदकतावच्छेदकेतरधर्मानवच्छिन्नावच्छेदकतायां साध्यतावच्छेदकताघटकसंबंधातिरिक्तसंबंधावच्छिन्नत्व-साध्यतावच्छेदकनिष्ठत्वोभयाभावविशिष्टत्वस्य निवेशनीय-त्वात्, तथाच रूपत्ववत्वान् रूपवान्वा पृथिवीत्वादित्यादौ विषयितावच्छिन्नरूपत्व निष्ठावच्छेदकतायां तादृशोभया भावासत्वेन विषयितयारूपत्वविशिष्टाभावस्य लक्षणाघटक-त्वान्नाव्याप्तिः, संयोगेन तद्वान्निमतः कथंचित्संबंधेन साध्य-तास्थले तु घटाभावो लक्षणघटकः घटत्वनिष्ठावच्छेदकता-यां साध्यतावच्छेदकनिष्ठत्वविरहेणोभयाभावसत्वात् ॥

रूपवान्पृथिवीत्वादित्यादौ विषयितयाव्याप्तिवारणाय साध्यतावच्छेदकताघटकसंम्बन्धावच्छिन्नत्वमेव प्रतियो-गितावच्छेदकतायां निवेशनीयमिति जगदीशेनोक्तं, अत्र-यमापत्तिः, अत्र कालिकसंबंधेन महानसानुयोगिकसंयोग-विशिष्टस्य समवायेन वन्हित्वविशिष्टस्य वन्हेः संयोगेन साध्यता धूमादिर्हेतु स्तत्र समवायसंबंधेन महानसानुयो-गिकसंयोगविशिष्टस्य कालिकेन वन्हित्वविशिष्टस्या भावस्य हेतुसमानाधिकरणस्य प्रतियोगितावच्छेदकत्वस्य साध्यता-वच्छेदकेसत्वादव्याप्तिरेवं विशेषरूपेण संसर्गता सत्वे वन्हि-त्वप्रतियोगिकसमवायेन वन्हित्वस्य साध्यतावच्छेदककस्थले साध्यतावच्छेदकताघटकसंसर्गावच्छिन्नावच्छेदकताकहे-

Indira Gandhi National Centre for the Arts

तुसमानाधिकरणाभावाप्रसिद्धया ऽव्याप्तिश्च, नच पूर्वोक्तस्थले कालिकेन महानसानुयोगिकसंयोगविशिष्टस्य समवायेन वन्हित्वविशिष्टस्य पर्वते सत्वात् पूर्वोक्ताताद्दशाभावस्य प्रतियोगिव्यधिकरणत्वाभावादेव नातिव्याप्तिरिति वाच्यं, समवायेन महानसानुयोगिकसंयोगविशिष्टस्य कालिकेन वन्हित्वविशिष्टस्य साध्यतायां धूमादिहेतावतिव्याप्तिभिया स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्वसामानाधिकरण्योभयसंबन्धेन स्वप्रतियोगितावच्छेदकताविशिष्टान्यत्वस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणताघटकनिरूपकतावच्छेदकतायां निवेश्यत्वात्। नच तथापि कालिकेन वन्हित्वनिष्ठावच्छेदकतानिरूपिकासती तेनैव सम्बन्धेन महानसानुयोगिकसंयोगनिष्ठावच्छेदकतानिरूपिता या अधिकरणता तस्या अपि निरुक्तस्वप्रतियोगितावच्छेदकताविशिष्टान्यवन्हित्वनिष्ठकालिकसम्बन्धावच्छिन्नावच्छेदकतानिरूपकत्वेन पर्वतादौ सत्वात् प्रतियोगिव्यधिकरणत्वाभाव इतिवाच्यं, स्वानवच्छेदकसम्बन्धावच्छिन्नत्व स्वसामानाधिकरण्योभयसम्बन्धेन स्वप्रतियोगितावच्छेदकताविशिष्टावच्छेदकतानिरूपकत्वस्य प्रतियोगितावच्छेदकावच्छिन्नाधिकरणताघटकनिरूपकतायां निवेशनीयत्वात्, मैवं स्वानवच्छेदकसम्बन्धावच्छिन्नत्व स्वसामानाधिकरण्योभयसम्बधेन साध्यतावच्छेदकताविशिष्टा या अवच्छेदकता तदनिरूपकत्वस्य प्रतियोगिताया विशेषणत्वेऽपि कालिकेन जातिविशिष्टस्य समवायेन धूमत्वविशिष्टस्य साध्यत्वे वन्ह्यादिहेतावतिव्याप्तिः, धूमत्वनिष्ठकालिकसम्बन्धावच्छिन्ना या साध्यतावच्छेदकता तदवच्छेदकसम्बन्धावच्छिन्नत्वस्वसामा-



Indira Gandhi National Centre for the Arts

नाधिकरण्यैतदुभयसम्बन्धेन तद्विशिष्टप्रतियोगितावच्छे-दकतानिरूपितत्वेन साध्याभावस्य लक्षणाघटकत्वात् स्व-निष्ठसाध्यतावच्छेदकतानवच्छेदकसम्बन्धावच्छिन्नत्वस्वनि-ष्ठत्वैतदुभयसम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदक-त्वानिरूपकत्वस्य निवेशेऽपि समवायेन ज्ञानत्वावच्छिन्न-स्य विषयितया स्वरूपतो ज्ञानत्वस्य यत्र साध्यतावच्छेद-कत्वं ज्ञानमित्याकारकज्ञानत्वं च हेतुस्तत्र साधनसमा-नाधिकरणस्य साध्यतावच्छेदकीभूततादात्म्यसम्बन्धावच्छि-न्नप्रतियोगिकस्य विषयितया ज्ञानत्वविशिष्टवज्ज्ञानभेदस्य निरुक्तोभयसम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेद-कत्वानिरूपकप्रतियोगितायामेव सत्वात्तत्र हेतावव्याप्तिः। नच स्वानवच्छेदकसम्बन्धावच्छिन्नत्व स्वसमनियतत्वोभय-सम्बन्धेन साध्यतावच्छेदकतावैशिष्ट्यं निवेश्यमतो न को-पि दोषइति वाच्यं, कालिकेन धूमत्वविशिष्टस्य समवा-येन धूमत्वविशिष्टस्य कालिकेन रूपत्वविशिष्टस्य समवाये-न रूपत्वविशिष्टस्य वा यत्र साध्यता तत्र धूमत्वविशि-ष्टधूमवान्वन्हे रूपत्ववद्रूपवान् ज्ञानत्वादित्यत्रातिव्याप्ति-रिति,अत्रकेचित्, स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्वसामा-नाधिकरण्यस्वसाजात्यैतत्त्रितयसम्बन्धेन साध्यतावच्छेदक-ताविशिष्टप्रतियोगितावच्छेदकत्वानिरूपकत्वविशेषणेन न दोषः॥ स्वसाजात्यंच निरवच्छिन्नत्वकिञ्चिद्धर्मावच्छि-न्नत्वान्यतररूपेण, अविलक्षणतया भासमानस्य धूमत्वादे-श्च न द्विधा साध्यतावच्छेदकत्वं मानाभावादतः कालिके-न स्वरूपत एव यत्र धूमत्वस्य साध्यतावच्छेदकत्वं समवाये-न तथात्वं तत्र नातिव्याप्ति, यत्र कालिकसमवायोभयसम्ब-

न्धेन धूमत्वस्य साध्यतावच्छेदकत्वं नच दोषप्रसक्तिरेव नास्तीति धेयम् ॥ सम्बन्धभेदेऽपि निरवच्छिन्नावच्छेदकता एकैवेति हृदयम्, नच तथाऽपि रूपत्ववत्वात् पृथिवीत्वादित्यत्र विषयितया स्वरूपतो रूपत्वविशिष्टाभावमादायाव्याप्तिरिति वाच्यं, एतच्चितयसम्बन्धेन साध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपकप्रतियोगिताकहेतुसमानाधिकरणाभावीयप्रतियोगितानिरूपितसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वसाध्यतावच्छेदकनिष्ठत्वोभयाभाववदवच्छेदकत्वाभावस्य साध्यतावच्छेदके विवक्षितत्वात्, परंतु स्वावच्छिन्नत्वस्वावच्छिन्नसाध्यतावच्छेदकताव्यापकत्वेतदुभयसम्बन्धेन साध्यतावच्छेदकताघटकसम्बन्धविशिष्टान्यसाध्यतावच्छेदकनिष्ठसाध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वानिरूपकत्वं प्रतियोगितायां निवेशनीयं, उक्ताभावप्रतियोगितावच्छेदकतायां स्वविशिष्टान्यत्वसम्पादनाय सम्बन्धघटकतया स्वावच्छिन्नत्वनिवेशः, समवायसम्बन्धेन जातिः साध्यतावच्छेदकतायां कालिकेन वह्नित्वस्य साध्यतावच्छेदकतायां जातिमद्वह्निमान् कूटत्वादित्यत्र सद्धेतौ समवायेन वह्नित्वविशिष्टकालिकेन जातिविशिष्टाभावमादायाव्याप्तिवारणार्थं सम्बन्धघटकतया व्यापकत्वनिवेशः, तथाच समवायसम्बन्धावच्छिन्नवह्नित्वनिष्ठनिरवच्छिन्नावच्छेदकताया स्वादृशविशिष्टान्यत्वात् निरुक्ताभावस्य लक्षणाघटकत्वमिति भावः ॥ वह्निमान्धूमादित्यादौ घटाभावस्य लक्षणघटकत्वसम्पादनाय साध्यतावच्छेदकनिष्ठे त्ववच्छेदकताविशेषणं, समवायेन प्रमेयसाध्यतावच्छेदकस्थले प्रमेयवत्वान्धूमादित्यादौ घटाभावस्य लक्षणाघटक

त्वेऽपि तत्तद्रक्तत्वाभावमादाय लक्षणगमनाय साध्यतावच्छे-
दकताघटकसम्बन्धावच्छिन्नत्वं साध्यतावच्छेदकनिष्ठावच्छे-
दकतायां विशेषणं देयमिति, यदि च वह्निमान्धूमा-
दित्यादौ निरुक्तसम्बन्धविशिष्टान्यसाध्यतावच्छेदकनिष्ठसा-
ध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्ध्या-
ऽव्याप्तिरिति विभाव्यते, तदा स्वावच्छिन्नत्वं स्वावच्छिन्नसा-
ध्यतावच्छेदकताव्यापकत्वं तदुभयसम्बन्धेन, साध्यताघट-
कसम्बन्धविशिष्टान्यावच्छेदकतानिरूपितत्व साध्यतावच्छे-
दकताघटकसम्बन्धावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदक-
त्वनिरूपितत्वोभयाभाववत्त्वस्य प्रतियोगितायां निवेश्य-
त्वान्न काचिदनुपपत्तिरिति ध्येयम् ॥ अथवा निरु-
क्तसम्बन्धेन तादृशसम्बन्धविशिष्टान्या या साध्यतावच्छेद-
कताघटकसम्बन्धविशिष्टावच्छेदकता तदनिरूपकत्वं हेतु-
मन्निष्ठाभावप्रतियोगितायां विवक्षितम्, साध्यतावच्छेदक-
ताघटकसम्बन्धवैशिष्ट्यञ्च स्वावच्छिन्नसाध्यतावच्छेदकताव्या-
पकत्वसम्बन्धेन, उभयव्यापकत्वं स्वनिरूपकप्रतियोगिता-
निरूपितावच्छेदकत्वस्वरूपेण बोध्यमिति ध्येयम् ॥ यद्वा
स्वानवच्छेदकसम्बन्धावच्छिन्नत्वस्वसमानाधिकरणावच्छेदक-
तानिरूपकत्वस्वनिरूपितसाध्यताश्रयवन्निष्ठप्रतियोगिव्यधि-
करणाभावीयत्वोभयसम्बन्धेन साध्यतावच्छेदकताविशिष्टा-
न्यत्वं हेतुमन्निष्ठाभावीयप्रतियोगितायां निवेश्यमतो न
कोऽपि दोषः ॥ न च विषयितया ज्ञानत्वेन ज्ञानत्व
विशिष्टस्य साध्यत्वे तज्ज्ञानत्वादिहेतौ विषयितया स्वरू-
पतो ज्ञानत्वविशिष्टभेदमादायाव्याप्तिरिति वाच्यम्, विशिष्ट
साध्यतावच्छेदकस्थले स्वावच्छिन्नावच्छेदकत्वीयस्वरूपस-

Indira Gandhi National Centre for the Arts

सम्बन्धेन यद्रूपेण साध्यतावच्छेदकत्वं तदितरानवच्छिन्नावच्छेदकताकहेतुमन्निष्ठाभावीयनिरुक्तसम्बन्धेन साध्यतावच्छेदकताविशिष्टान्यप्रतियोगितावच्छेदकत्वाभावस्य साध्यतावच्छेदके विवक्षितत्वादिति ध्येयम् ॥ अथ साध्यवद्वृत्यभावीयत्वसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वोभयाभावविशिष्टहेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकताकत्वस्य साध्यतावच्छेदके विवक्षितत्वात्साध्यतावच्छेदकतदितरेत्याद्यवच्छेदकतायां निरवच्छिन्नत्वं यद्रूपेण साध्यतावच्छेदकत्वं तत्तदितरोभयानवच्छिन्नत्वं साध्यतावच्छेदताघटकसम्बन्धावच्छिन्नत्वमित्यादि विशेषणं व्यर्थमिति, न च कपिसंयोग्येतत्वादित्यादावव्याप्तिवारणार्थं प्रतियोगिवैयधिकरण्यनिवेशवैयर्थ्यमिति वाच्यम्, कपिसंयोगी सत्वादित्यादौ कपिसंयोगाभावस्य तादृशोभयाभावविशिष्टप्रतियोगिताकत्वविरहाल्लक्षणाघटकतयाऽतिव्याप्तिवारणाय निरवच्छिन्नवृत्तिकाभावीयत्वसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितत्वोभयाभावस्य वक्तव्यतया साध्याभावमादायोक्तस्थलेऽव्याप्तिवारणाय तद्दलसार्थक्यात्, न च विशिष्टसत्ताभाववान् जातेरित्यादावतिव्याप्तिः विशिष्टसत्ताभावाभावस्य विशिष्टसत्तानतिरेकितया तदीयप्रतियोगितायां तादृशोभयाभावसत्वेन लक्षणघटकत्वादिति वाच्यम्, साध्यवद्वृत्तितावच्छेदकीभूतानुयोगितानिरूपितत्वघटितोभयाभावस्यप्रतियोगितायां निवेशनीयत्वात् न च प्रमेयवत्वान् धूमादित्यत्र प्रमेयसाध्यतावच्छेदककस्थले तादृशोभयाभावप्रतियोगिताकाभावाप्रसिद्ध्याऽव्याप्तिरिति वाच्यम्, तत्र परम्परासम्बन्धेन प्रमेयत्वस्यैव साध्यतावच्छेदकत्वात् तथाच प्र-

Indira Gandhi National
Centre for the Arts

टाभावमादाय तत्र लक्षणसङ्गतिः, नच तत्राव्याप्तिवारणाय सावच्छिन्नवृत्तिकान्यसाध्यवद्वृत्त्यभावीयत्वघटितोभयाभाववत्त्वं तादृशप्रतियोगितायां विवक्षणीयम्, घटाद्यभावस्य सावच्छिन्नवृत्तिकान्यत्वाभावेन तदीयप्रतियोगितायां तादृशोभयाभाववत्त्वेन तमादाय लक्षणसमन्वयसम्भवे एतावान् प्रयासोऽनुचित इति वाच्यम्।

तथासति संयोगी द्रव्यत्वादित्यादौ कपिसंयोगाभावस्यापि तथात्वेन तमादायाव्याप्तिरिति। सेवं, समवायसम्बन्धावच्छिन्नवह्न्यभावमादाय वह्निमान् धूमादित्यादावव्याप्तिमाशंक्य ग्राह्यसमानाधिकरण्ये हेतोर्यादृशः सम्बन्धः प्रविष्ट इति प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणस्यवैयर्थ्यप्रसंगात्, नच भवतु वैयर्थ्यमिति वाच्यम्। वृत्त्यनियामकसम्बन्धावच्छिन्नप्रतियोगित्वानंगीकारे सम्बन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावस्य तादृशोभयाभाववत्प्रतियोगिताकत्वविरहेण लक्षणाघटकतया स्वामित्वादिसम्बन्धेन धनादिसाध्यकद्रव्यत्वादिहेतावतिव्याप्तेः। अस्मन्मते तु साध्यतावच्छेदकसम्बन्धेनप्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिसम्बन्धान्तरावच्छिन्नप्रतियोगिताकसाध्याभावमादाय नातिव्याप्तिः, अत्रच साध्यतावच्छेदकसम्बन्धेन प्रतियोगिव्यधिकरणसाध्यवद्वृत्त्यभावीयत्वघटितोभयाभाववत्त्वविवक्षणे न कोपि दोष इतिधेयम्॥

अथैतत्कल्पे साध्यताघटकसम्बन्धावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेन प्रतियोगितावच्छेदकाश्रयाधिकरणत्वाभाववद्वृत्त्यधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यस्य व्याप्तित्वसम्भवे

व्यर्थं साध्यतावच्छेदकतदितरेत्यादिविशेषणमिति। नच घटत्वाभाववान्द्रव्यत्वादित्यादावतिव्याप्तिः, सर्वस्यैव हेतुमतः प्रतियोगितावच्छेदकीभूताभावत्वाश्रयाधिकरणत्वादिति वाच्यं, । साध्यतावच्छेदकसम्बन्धावच्छिन्नसाध्यतावच्छेदकावच्छिन्नाधिकरणत्वीयस्वरूपसम्बन्धेन प्रतियोगितावच्छेदकाश्रयाधिकरणत्वाभावस्य विवक्षितत्वादिति चेन्न। व्याप्यवृत्त्यव्याप्यवृत्तिसाध्यकस्थलसाधारणसाध्यतावच्छेदकतदितरेत्यादिविशेषणखण्डनस्य सन्दर्भविरोधापत्तेरिति धेयम्। अथ प्रतियोगितासम्बन्धेन महानसीयवह्न्यादेस्साध्यत्वे तदभावत्वादिहेतावव्याप्तिः, प्रत्येकेन महानसीयो नास्ति वह्निर्नास्तीत्याद्यभावीयप्रतियोगितावच्छेदकत्वस्यैव साध्यतावच्छेदके सत्वादिति चेन्न। साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वपदेनानुमितिविधेयतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितानवच्छेदकीभूतो योऽभावीयप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकोधर्मस्तद्धर्मानुयोगिताकपर्याप्तिकसाध्यतावच्छेदकताविशिष्टावच्छेदकत्वानिरूपितत्वस्य प्रतियोगितायां विवक्षितत्वादिति। साध्यतावच्छेदकतावैशिष्ट्यञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्वंस्वसामानाधिकरण्यं तदुभयसम्बन्धेन, एवञ्च साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वनिवेशस्य तत्रैव तात्पर्य्यमिति॥

ननु साध्यतावच्छेदकतावृत्तिधर्मावच्छिन्नावच्छेदकत्वानिरूपितत्वस्य साधनवन्निष्ठाभावप्रतियोगितायां निवेशनेनैवाव्याप्तिवारणात् किं शुद्धसाध्यतावच्छेदककस्थले विशिष्टसाध्यतावच्छेदककस्थले च द्विधा निवेशेन, वृत्तित्वं च स्वा-

वच्छेद्यत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वसम्बन्धे-नेतिचेन्न महानसीयवह्निमान्धूमादित्यादावतिव्याप्तिर्निरू-कसम्बन्धेन वह्नित्वनिष्ठावच्छेदकतावृत्तियन्महानसीयत्वत्वं तद्धर्मावच्छिन्नावच्छेदकतानिरूपितत्वस्य साध्याभावप्रतियो-गितायां सत्वेन साध्याभावस्य लक्षणाघटकत्वात्, नच साध्यतावृत्तिधर्मावच्छिन्नावच्छेदकत्वानिरूपितत्वस्य हेतुम-न्निष्ठाभावप्रतियोगितायां निवेशान्न दोषः। साध्यतावृत्तित्वं च स्वावच्छिन्नावच्छेदकत्वनिरूपितत्वसम्बन्धावच्छिन्नस्वनि-ष्ठावच्छेदकताकभेदवत्वसम्बन्धेनेति वाच्यं, वृत्तिवह्नित्वव-त्वान्धूमादित्यादौ महानसीयवह्निवृत्तित्वविशिष्टवदभावमा-दायाव्याप्तिरिति ॥ ० ॥

अथ साध्यवद्वृत्त्यभावीयसाध्यतावच्छेदकनिष्ठावच्छेद-कत्वानिरूपितत्वस्य प्रतियोगितायां निवेशादेव सामञ्जस्ये प्रतियोगितायां तादृशोभयानवच्छिन्नत्वस्य शुद्धसाध्यता वच्छेदकस्थले अवच्छेदकतायां निरवच्छिन्नत्वस्य विशि-ष्टसाध्यतावच्छेदकस्थले च तादृशोभयानवच्छिन्नत्वस्य वैफल्यमिति॥ नच प्रमेयसाध्यतावच्छेदकस्थले तादृश-प्रतियोगित्वाप्रसिद्धिरिति वाच्यं, विशिष्टसाध्यतावच्छेद-कस्थले तादृशोभयानवच्छिन्नत्वमवच्छेदकतायामनिवेश्य प्रागुक्तरीत्या स्वावच्छिन्नावच्छेदकत्वीयस्वरूपसम्बन्धेन सा-ध्यवद्वृत्त्यभावीयसाध्यतावच्छेदकनिष्ठावच्छेदकत्वानिरूप-कप्रतियोगिताकाभावीयप्रतियोगितावच्छेदकत्वाभावस्य सा-ध्यतावच्छेदके विवक्षणात् तत्र घटाभावीयघटनिष्ठप्रतियो-गित्वस्यैव तादृशस्यसम्भवात् घटत्वस्य निरवच्छिन्नावच्छेदक त्वसम्भवात्, नच तद्रूपवान् तद्रसादित्यादौ साध्यवद्वृत्त्य

भावीयसाध्यतावच्छेदकनिष्ठावच्छेदकत्वाप्रसिद्ध्याऽव्याप्तिरिति वाच्यं, पूर्वक्षणवृत्तित्वविशिष्टतद्रूपाभावप्रतियोगितावच्छेदकत्वस्य तथाविधस्य सौलभ्यात्। वस्तुतस्तु विषयितासम्बन्धेन तद्रूपत्ववज्ज्ञानाभावीयावच्छेदकतायाः प्रसिद्धिसम्भवादेतेन अन्त्यशब्दस्य क्षणिकपदार्थस्य वा साध्यतायां सङ्केताविप नाव्याप्तिस्तत्र विशिष्टाभावासम्भवेऽपि उक्तरीत्यैव प्रसिद्धिसम्भवात्, इत्यञ्चावच्छेदकतायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नत्वस्य व्याप्यवृत्तिसाध्यकस्थले प्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य च निवेशोऽपि विफल इति अतीवलाघवमिति, नचैवं संयोगी सत्त्वादित्यादावतिव्याप्तिः संयोगाभावस्य व्याप्यवृत्तित्वेन साध्यवद्वृत्तित्वादिति वाच्यं, साध्यवन्निरवच्छिन्नवृत्तिकत्वस्याभावे निवेशितत्वेन तत्र साध्याभावप्रतियोगिताया लक्षणघटकत्वसम्भवादतएव प्रतियोगिवैयधिकरण्यस्य सार्थक्यमन्यथा संयोगी-द्रव्यत्वादित्यादावव्याप्तिः, नच संयोगाभावस्य संयोगाभावत्वेन साध्यवन्निरूपितसावच्छिन्नवृत्तिकत्वेऽपि अभावत्वादिना प्रमेयत्वादिना वा निरवच्छिन्नवृत्तिमत्वादुक्तातिव्याप्तितादवस्थ्यमिति वाच्यं, साध्यवन्निरूपितावच्छिन्नवृत्तिकान्याभावस्य निवेशितत्वात्, नच वन्हिमान्धूमादित्यादौ महानसीयवन्ह्यभावादेरपि कालिकेन व्याप्यवृत्तित्वेन तादृशप्रतियोगित्वाप्रसिद्धिरिति वाच्यं, अभावीयविशेषणताविशेषावच्छिन्नसाध्यवन्निरूपितावच्छिन्नवृत्तिकान्यत्वस्य विवक्षितत्वादितिचेदत्रवदन्ति, संयोगी द्रव्यत्वादित्यादावव्याप्तिः, तत्र कपिसंयोगाभावस्याव्याप्यवृत्तित्वेन साध्यवन्निरूपितावच्छिन्नवृत्तिकान्यत्वविरहात् कपिशून्यत्वे धि-

करणे वक्ष्यमाणप्रतियोगिव्यधिकरणत्वाच्च, इत्यञ्च तादृशदोषवारणाय प्रतियोगितायां साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वस्य सामानाधिकरण्यसम्बन्धेन कपिप्रतियोगिकत्वविशिष्टसंयोगत्वावच्छिन्नाभावमादायाव्याप्तिवारणाय निरवच्छिन्नावच्छेदकत्वस्य च निवेशे लाघवानवकाशात्, प्रत्युत यथोक्तगुरुतरविशेषणदानेन गौरवमिति । केचित्तु द्रव्यवृत्तित्वविशिष्टगगनाभावाभाववान् जातेरित्यादावतिव्याप्तिस्तत्र साध्याभावस्य विशिष्टगगनाभावानतिरिक्तस्य गगनाभावस्य गुणवृत्तित्वेन प्रतियोगिताया लक्षणाघटकत्वादित्याहुः । यदि पुनः साध्यवन्निरूपितं यद्विशेषणताविशेषसम्बन्धावच्छिन्नाधेयत्वं तदवच्छेदकीभूतं यदनुयोगित्वं तन्निरूपितप्रतियोगितानिरूपितं यत्साध्यतावच्छेदकनिष्ठावच्छेदकत्वं तदनिरूपकत्वस्य प्रतियोगितायां निवेशेन नोक्तदोषाणामवकाशइति विभाव्यते तदा द्रव्यत्वाद्यात्मकाभावमादाय प्रमेयवान्वाच्यत्वादित्यादावव्याप्तिर्द्रष्टव्या, नच विशेषणताविशेषसम्बन्धावच्छिन्नत्वञ्च स्वप्रतियोगिमत्ताग्रहविरोधिताघटकसम्बन्धावच्छिन्नइति वक्तव्यमतो नोक्तदोष इति वाच्यं, तथाऽपि कपिसंयोगत्वरूपाभावमादाय तत्रैवाव्याप्तिसम्भवादिति ॥

रूपवान् पृथिवीत्वादित्यादौ विषयितया रूपत्ववज्ज्ञानाभावमादायाव्याप्तिवारणार्थं प्रतियोगितायां साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकतानिरूपितत्वं जगदीशेन निवेशितं, तत्रेयमाशङ्का, कालिकेन धूमत्वादिविशिष्टस्य संयोगेन साध्यतायां वन्ह्यादिहेतौ समवायेन धूमत्वविशिष्टस्य कालिकेन तद्विशिष्टाभावमादायाव्याप्तेस्तादृ-

ग्प्रतियोगितायां साध्यतावच्छेदकतावटककालिकसम्बन्धा वच्छिन्नावच्छेदकतानिरूपितत्वात्। नच साध्यतावच्छेदकताघटकसंसर्गतावच्छेदकतापर्याप्त्यनुयोगितानवच्छेदकोभूतधर्मावच्छिन्नपर्याप्तिकावच्छेदकतानिरूपितसंसर्गताकावच्छेदकत्वानिरूपितत्वनिवेशेन नाव्याप्तिरितिवाच्यं, कालिकेन महानसीयत्वविशिष्टस्य समवायेन वन्हित्वविशिष्टस्य साध्यतायां धूमादिहेतौ समवायेन वन्हित्वविशिष्टस्य समवायेन महानसीयत्वविशिष्टाभावमादायाव्याप्तिस्तादृशप्रतियोगितायां तादृशावच्छेदकत्वानिरूपितत्वादचोच्यते, हेतुसमानाधिकरणप्रतियोगितायां साध्यतावच्छेदकतावटकसंसर्गतावच्छेदकताकपर्याप्तिकावच्छेदकत्वव्यापकत्वनिवेशेन नदोषः व्यापकता च स्वावच्छेदकसंसर्गतावच्छेदकतापर्याप्त्यवच्छेदकत्वसम्बन्धेन स्वप्रतियोगित्वं, व्याप्यत्वं तु स्वरूपसम्बन्धेन, अत्रे यमाशङ्का, ननु कालिकेन महानसीयत्वविशिष्टसमवायेन वन्हित्वविशिष्टस्य साध्यतायां धूमादिहेतौ समवायेन महानसीयत्वविशिष्टस्य कालिकेन वन्हित्वविशिष्टस्याभावमादायाव्याप्तिस्तादृशप्रतियोगितायाः तादृशावच्छेदकत्वव्यापकत्वात्, नच हेत्वधिकरणस्यैव स्वप्रतियोगितावच्छेदकतावटककालिकेन महानसीयत्वविशिष्टं यत् तादृशसमवायसम्बन्धेन वन्हित्वविशिष्टं यत् तदधिकरणत्वात् तादृशाभावस्य प्रतियोगिव्यधिकरणत्वाभावान्नाव्याप्तिरिति वाच्यं, समवायेन महानसीयत्वविशिष्टं कालिकेन वन्हित्वविशिष्टं यत्तस्य साध्यतायां धूमादिहेतावतिव्याप्तिवारणार्थं प्रतियोगिवैयधिकरण्यस्य विशिष्य निवेशनीयत्वात्, विशेषस्तु प्रतियोगितावच्छेदकतात्वव्यापकं यदधिकरणत्वंतदधिक-

Indira Gandhi National Centre for the Arts

रणत्वाभाववद्वृत्त्यधिकरणवृत्तित्वमभावे निवेशनीयं, व्याप-कत्वं तु स्वनिरूपकतावत्त्वसम्बन्धेन स्वं—अधिकरणत्वं स्व-निरूपकतावच्छेदकतावत्त्वञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व—स्वसामानाधिकरण्यस्वानवच्छेदकानवच्छिन्नत्व-स्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन, स्वं अधिकरणतानिरूपकतावच्छेदकत्वेनाभिमतं स्ववृत्तित्वञ्च स्वानवच्छेदकानवच्छेद्यत्व-सम्बन्धेन अत्र स्वप्रतियोगितावच्छेदकत्वेनाभिमतं, अत्र ब्रूमः, साध्यतावच्छेदकत्वविशिष्टप्रतियोगित्वान्यप्रतियोगि-ताकाभावएव लक्षणे निवेशनोयः, साध्यतावच्छेदकतावैशिष्ट्यं स्वसामानाधिकरण्यस्वनिष्ठभेदप्रतियोगितावच्छेदकत्वै-तदुभयसम्बन्धेन, स्वपदं साध्यतावच्छेदकत्वपरं, साध्यतावच्छेदकत्वसामानाधिकरण्यन्तु स्वावच्छेदकसम्बन्धेन, स्वप्र-तियोगित्वभेदप्रतियोगितावच्छेदकत्वञ्च स्वावच्छेदकता-वत्त्वसम्बन्धेन, उभयत्र स्वप्रतियोगित्वं स्वावच्छेदकतावत्त्वञ्च स्वावच्छेदकसम्बन्धावच्छिन्नत्व—स्वसमानाधिकरण्यस्वान-वच्छेदकानवच्छिन्नत्वस्ववृत्तित्वैतच्चतुष्टयसम्बन्धेन, स्वं प्र-तियोगितावच्छेदकत्वं, स्ववृत्तित्वं च स्वानवच्छेदकानव-च्छिन्नत्वसम्बन्धेन, स्वं साध्यतावच्छेदकत्वं इत्येतादृशवि-वक्षायां न प्रागुक्तदोष इति ॥

साध्यतावच्छेदकतदितरोभयानवच्छेद्यत्वं निवेशेऽपि म-हानसीयवन्हेः प्रतियोगितासम्बन्धेन साध्यतायां तदभाव त्वादिहेतौ प्रत्येकेन महानसीयभावं वन्ह्यभावश्चादाया-व्याप्तिरतस्तद्वारणाय हेतुसमानाधिकरणाभावप्रतियोगि-तायां साध्यतावच्छेदकताल्लावच्छिन्नप्रतियोगिताकपर्याप्त्य-नुयोगितानवच्छेदकीभूतधर्मावच्छिन्नानुयोगिताकपर्याप्ति-

प्रतियोगितावच्छेदकीभूतावच्छेदकतात्ववत् साध्यतावच्छेदकनिष्ठावच्छेदकत्वानिरूपितत्वस्य साध्यतावच्छेदकतदितरेत्यनेन विवक्षितत्वादिति धेयम्, ॥

महानसीयवन्ह्यभावमादाय।व्याप्तिवारणाय प्रकृतानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेकीभूतधर्मावच्छेदेन प्रतियोगितावच्छेदकतापर्याप्त्यनधिकरणत्वं विवक्षित मिति, एको न द्वाविति प्रतीतिवत् वन्हित्वं धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकमितिप्रतीतिबलात् प्रतियोगिन्यपि व्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्वीकारादिति प्रांचः, तच्च पर्याप्तेर्व्याप्यवृत्तित्वमते न सम्भवतीत्यतः साध्यतावच्छेदकेत्यादि निवेशितं जगदीशेन, ।

अथेदं चिन्त्यते, पर्याप्तेर्व्याप्यवृत्तित्वनयेऽपि प्रकृतानुमितिविधेयतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यवच्छेदको हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनवच्छेदको यो धर्मस्तद्विशिष्टावच्छिन्नसामानाधिकरण्यं व्याप्तिरिति कुतो न कृतं, । यदि च प्रतियोगितानवच्छेदकत्वगर्भलक्षणमादृत्य प्रयास इति विभाव्यते तदाऽपि प्रकृतानुमितिविधेयतावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छिन्नत्वसम्बन्धेन हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वाभावविवक्षणादेव सामञ्जस्ये कृतं साध्यतावच्छेदकतदितरेत्यादि निवेशनेति। यदि च व्यासज्यवृत्तिसाध्यतावच्छेदकत्वादेः पर्याप्तिसम्बन्धो न प्रामाणिकः अतएवावच्छेदकत्वनिरुक्तौ एकत्ववन्हित्वादेः पर्याप्तिसंबंधे मानाभाव इत्युक्तं जगदीशेन तदानैतादृशी रीतिः संभवतीति साध्यतावच्छेदकेत्यादि-

IGNCA RAR
ACC. No. R-122
SANS
181.4
SID
Indira Gandhi National Centre for the Arts

विशेषणमावश्यकं, अथैतत्कल्पे सामान्याभावानुत्थितिप्रसंग-इति चेन्न। अतिरिक्तसामान्याभावाभ्युपगमेऽपि वह्निर्नास्तीतिप्रतीतिसिद्धविलक्षणावच्छेदकत्ववत् प्रतियोगिताऽपि न स्वीकरणीया, मैवं, तादृशोभयानवच्छिन्नाभावमादायैव तत्संगतिरिति ध्येयम्॥

अथैवमपि धूमत्वादौ धूमत्वविशिष्टाभावप्रतियोगितावच्छेदकत्वाभावो वह्नित्वादावुपनयमर्य्यादया भासतइति दीधितिग्रन्थविरोधः, वह्नित्वतदितरोभयानवच्छिन्नधूमवन्निष्ठमहानसीयधूमाभावीयप्रतियोगितावच्छेदकत्वस्य धूमत्वे सत्वात्, भ्रमानुसरणे च घटादौ इत्युपेक्षणे बीजाभावादिति चेन्न। साध्यतावच्छेदकेतरनिष्ठासती उभयनिष्ठा या अवच्छेदकता तद्भिन्नत्वं निवेश्यमिति, महानसीयवन्ह्यभावमहानसीयधूमाभावयोर्लक्षणाघटकतेति तादृशसंगतिः, वस्तुतस्तु साध्यतावच्छेदकतदितरत्वेनन साध्यतावच्छेदकेतरघटितोभयानवच्छिन्नत्वस्य विवक्षितत्वात् धूमादावपि वन्हित्वेतरघटितोभयानवच्छिन्नधूमवन्निष्ठघटाद्यभावीयप्रतियोगितावच्छेदकत्वाभावसत्वेनाविशेषितत्वात्॥

प्रमेयसाध्यतावच्छेदककस्थले साध्यतावच्छेदकेतराप्रसिद्ध्याऽव्याप्तिवारणमाशंक्यैव पारिभाषिकावच्छेदकत्वानुसरणं कृतंजगदीशेन अत्र घटत्वादेः साध्यतावच्छेदकत्वात् यथोक्ततदितरत्वाच्च घटनिष्ठप्रतियोगित्वं कथमुभयानवच्छिन्नमिति केचित्, अत्र वदंति, साध्यतावच्छेदवनिष्ठावच्छेदकता तदितरनिष्ठावच्छेदकता एतदुभयानिरूपकत्वस्य प्रतियोगितायां निविष्टत्वात्, तदुभयानिरूपकत्वस्य इयत्वपर्याप्त-

Indira Gandhi National Centre for the Arts

धिकरणनिरूपकत्वमर्थः, न च पर्याप्तेः प्रत्येकमपि स्वीका-
रेण एकस्या अप्यवच्छेदकताया द्वयत्वपर्याप्त्यधिकरणत्वात्
यथोक्तोऽर्थ अकिञ्चित्कर इति वाच्यं, साध्यतावच्छेदक-
निष्ठावच्छेदकत्वनिरूपकत्वं यच्च तदितरनिष्ठावच्छेदकता
निरूपकत्वमेतदुभयत्वपर्याप्त्यवच्छेदकाभावस्य तदर्थत्वात्, न
च तथाऽपि महानसीयवह्निमान्धूमादित्यादावतिव्याप्तिः, तत्र
वह्नित्वस्य पारिभाषिकावच्छेदकेतरत्वसम्भवेन महानसीयव-
ह्निनिष्ठप्रतियोगितायां तन्निरूपकत्वद्वयाभावसत्वादिति वा-
च्यं, साध्यसाधनभेदेन व्याप्तेर्भेदात्, प्रमेयसाध्यतावच्छेदक-
स्थले एव पारिभाषिकस्य कर्तव्यत्वादन्यत्र यथोक्तस्यैव निवि-
ष्टत्वात्, नचैवंरीत्या लाघवानुसन्धाने वह्निमान्धूमादित्या-
दौ उभयानवच्छिन्नविशेषणमेव दीयतां किं साध्यतावच्छे-
दकेत्यादिगुरुतरविशेषणेनेति वाच्यं, इष्टत्वात्। केचित्तु प्र-
मेयसाध्यतावच्छेदकस्थलेऽप्रसिद्ध्याशंकनं तद्वारणप्रयासश्च द्व-
यमेव ग्रन्थकृतोमनस्यभिप्रेतम्। नचेत्यादिपाठस्तु काल्पनि-
कः न च तदनुपपत्तेः कागतिरिति वाच्यं, । दीधितिकृन्म-
ते सखण्डस्य साध्यतावच्छेदकत्वमेव नास्ति दण्डादौ सा-
ध्ये इत्यादिग्रन्थेन तथोक्तत्वात्, इत्थञ्च यथोक्तस्थले परम्परा-
सम्बन्धेन प्रमेयत्वस्य साध्यतावच्छेदकत्वेनानुपपत्तेरभावा-
दित्याहुः ॥ ० ॥

साध्यतावच्छेदकातिरिक्तसाध्यवृत्तिधर्मानवच्छिन्नत्वनि-
वेशकल्पे अनवच्छेदकत्वपर्यन्तानुधावनस्य वैयर्थ्यापत्त्या प्रमे-
यसाध्यकस्थले ऽव्याप्तेश्चेति दूषितमिति। अत्र केचित्। पू-
र्वदोषइष्टापत्तेरपरो दोषो वक्तव्यस्तया च विषयितास-
म्बन्धेन प्रमेयत्वविशिष्टाभावमादाय गगनाभावादिप्रमेय

Indira Gandhi National
Centre for the Arts

एवाप्रतियोगित्वसम्भवेन लक्षणसमन्वयसम्भवः, एतत्कल्पे
साध्यतावच्छेदकताघटकसम्बन्धेनावच्छेदकताया निष्प्रयो
जकत्वेनाप्रवेशादिति पूर्वपक्षयन्ति, तन्न प्रमेयसाध्यकस्थले
तत्प्रमेयानुयोगिकस्वरूपसम्बन्धेन प्रमेयत्वविशिष्टस्य चाल-
नीन्यायेनाभावमादायैतदनुयोगिकेन कालिकादिना सम-
वायेन वा वह्नित्वविशिष्टाभावमादाय वह्निमान्धूमादि-
त्यादौ चाव्याप्तिवारणाय चैतत्कल्पे च साध्यतावच्छेदक-
ताघटकसम्बन्धावच्छिन्नावच्छेदकताया निविष्टत्वात्, विशे-
शेषरूपेण संसर्गतानभ्युपगमे तादात्म्येन कालिकविष-
यतान्यतरसम्बन्धेन गुणत्वविशिष्टस्य गुणस्य साध्यतायां सं-
योगनित्यज्ञानान्यतरत्वादावव्याप्तिस्तत्र नित्यज्ञानरूपहेत्व-
धिकरणे कालिकेन गुणत्ववतोऽभावस्य संयोगरूपहेत्वधि-
करणे च विषयितया गुणत्ववतोऽभावस्य धर्तव्यत्वेनाव्या-
प्त्यापत्तेः ॥

न च गगनत्वानवच्छिन्नं यत्साध्यतावच्छेदकातिरिक्तसा-
ध्यवृत्तिधर्मावच्छिन्नत्वमेतदुभयाभावस्य प्रतियोगितायां नि-
वेशनीयत्वात् गगनाभावमादायैव लक्षणसमन्वय इति वाच्यं,
प्रमेयस्य तादात्म्येन साध्यतायां गगनत्वादिहेतावव्याप्त्या-
पत्तेः, अत्र गगनाभावस्य लक्षणाघटकत्वात्, न च गगन-
त्वानवच्छिन्नेत्यत्राव्याप्तिमात्रवृत्तिधर्मानवच्छिन्नेति वक्तव्यमि-
ति, तत्र महाकालाद्यभावमादाय लक्षणसमन्वयसंभवइति
वाच्यं, गगनान्यतमस्य तादात्म्येन साध्यतायां तादृशान्यत-
मत्वहेतावव्याप्त्यापत्तेः, तत्र चालनीन्यायेन गगनादीनाम-
भावस्य साध्यमात्रे सत्वात्, न च यथोक्तदोषेणैवावच्छेद-
कत्वानुधावनं कर्तव्यमिति तादृशकल्पस्य निर्दोषत्वमिति वा-

च्यं, गगनरूपतादृशान्यतमाभावमादायानवच्छेदकत्वानुसरणेऽपि दोषतादवस्थ्यादिति ध्येयम् ॥

पर्वते महानसीयवह्निवृत्तित्वविशिष्टजातिमदभावमादायाव्याप्तिवारणाय गुरुसाध्यतावच्छेदकस्थले अवच्छेदकतायां निरवच्छिन्नत्वं घटे पटसमवेतत्वविशिष्टजातिमदभावमादायाव्याप्तिवारणाय यद्रूपेण साध्यतावच्छेदकतेत्यादिकमुक्तं जगदीशेन। अथ स्वानवच्छिन्नानुमितिविधेयतावच्छेदकताकधर्मानवच्छिन्नत्वस्यावच्छेदकतायां निवेशेनैव सामंजस्ये द्विविधविशेषणमनुचितमिति वाच्यं, न च प्रमेयवत्वाद्धूमादित्यादौ तादृशधर्मांप्रसिद्धिरिति वाच्यं, तत्र तावताऽपि साध्यतावच्छेदकतावच्छेदकतदितराप्रसिद्धा दोषवारणाय पारिभाषिकेतरत्वं वक्तव्य मिति मयापि तत्र पारिभाषिककर्तव्यत्वेन सत्यभावादिति वदन्ति। वह्निमान्धूमादित्यादौ अवच्छेदकत्वानिरूपकत्वरूपनिरवच्छिन्नत्वापेक्षया यथोक्तातिगुरुतरनिवेशेऽनुमितिव्याप्तिज्ञानकार्यकारणभावस्य महागौरवमिति ग्रन्थैकस्याकिंचित्करत्वमिति ॥

यद्रूपानवच्छिन्नसाध्यतावच्छेदकत्वं तदवच्छिन्नावच्छेदकत्वानिरूपकत्वस्य तादृशप्रतियोगितायां निवेशेनैव सामञ्जस्ये कृतं द्विधा निवेशेनैव, नच वह्नित्वधूमत्वतदुभयवान् वह्नेरित्यादावतिव्याप्तिर्वह्नित्वत्वावच्छिन्नं यत्साध्यतावच्छेदकत्वं तस्य धूमत्वत्वानवच्छिन्नत्वेन तदवच्छिन्नावच्छेदकताकप्रतियोगित्वस्य लक्षणाघटकत्वेन तादृशोभयवदभावस्य धर्तुमशक्यत्वादिति वाच्यं, साध्यतावच्छेदकतासामान्यं यद्रूपानवच्छिन्नमित्यस्य विवक्षितत्वात्, अ-

Indira Gandhi National Centre for the Arts

त्केचित् शुद्धसाध्यतावच्छेदककस्थले कार्यकारणभावगौरव भयेन द्विविधाकारानुमित्यापत्तिभयेन च द्विधा निवेशनं, न चावच्छेदकतासम्बन्धेन साध्यतावच्छेदकत्वाभाववद्धर्मान-वच्छिन्नावच्छेदकत्वविवक्षणेनैव लाघवमिति वाच्यं, तादृश-संसर्गस्य वृत्यनियामकत्वात् तदवच्छिन्नप्रतियोगित्वाप्रसि-द्धेः यद्यपि साध्यतावच्छेदकतावृत्तिभेदप्रतियोगितावच्छेद-कं यत् तदनवच्छिन्नावच्छेदकत्वनिवेशेन न कोपि दोषः। भेदप्रतियोगितावच्छेदकत्वमवच्छिन्नत्वसम्बन्धेन बोध्यं, त-थाऽपि जातिमत्त्वान्वाच्यत्वादित्यादावतिव्याप्तिः साध्यताव-च्छेदकवृत्तिप्रमेयवद्भेदप्रतियोगितावच्छेदकत्वस्य जातित्वेऽन पायात्साध्याभावस्य लक्षणाघटकत्वादिति। न च साध्यता-वच्छेदकतावृत्तिभेदप्रतियोगितावच्छेदकत्वं यद्रूपेण तद-वच्छिन्नावच्छेदकत्वं विवक्षितमित्यादिरीत्या न कोपि दो ष इति वाच्यं, जातिमत्त्वान्वाच्यत्वादित्यादावतिव्याप्तिर वच्छिन्नत्वसम्बन्धेन तज्जातिमद्भेदस्यापि साध्यतावच्छेद-कताद्यां सत्त्वादिति ध्येयम्॥

नच महानसीयवन्हिवृत्तिजातिमत्त्वस्य द्रव्यत्वादावपि सत्वेन प्रतियोगितायां कथं साध्यतावच्छेदकतदितरोभ यानवच्छिन्नत्वमिति वाच्यं, महानसीयवन्हिवृत्तित्वविशि-ष्टवन्हित्ववान्नास्तीतिप्रतीतिसिद्धाभावमादायाव्याप्तेर्दातव्य-त्वात्, महानसीयवन्हिवृत्तित्वस्य वन्हित्वप्रतियोगिकत्वसम-वायसम्बन्धावच्छिन्नत्वस्य निवेशे ग्रन्थकृदुक्तप्रतीतिसिद्धाभा-वमादायाव्याप्तिदाने क्षत्यभावाच्च, नच महानसीयवन्हिवृ-त्तित्वविशिष्टजातिमद्वन्हिर्नास्तीतिप्रतीतिसिद्धाभावमादाय तथाव्याप्तेर्दुरुद्धरत्वापत्तिः, तत्र वन्हित्वस्य निरवच्छिन्ना-

Indira Gandhi National Centre for the Arts

वच्छेदकता सत्त्वादिति वाच्यं, अवच्छिन्नावच्छेदकत्वानिरूपकत्वस्य प्रतियोगितायां निवेशितत्वात् । वस्तुतस्तु तादृशप्रतीतिसिद्धाभावीयाया अवच्छेदकताया अवच्छिन्नत्वनिरवच्छिन्नत्वेन द्विविधायाः स्वीकारे प्रमाणाभावेन अवच्छिन्नावच्छेदकताया वह्नित्वे सत्त्वेनाव्याप्तिवारणसम्भवात् । अथ विशिष्टसाध्यतावच्छेदकस्थले घटे पटसमवेतत्वविशिष्टजातिमान्नास्तीतिप्रतीतिसिद्धाभावमादाय समवेतत्वविशिष्टजातिमत्त्वात् घटत्वादित्यादौ समवेतत्वेन समवेतसामान्यस्य साध्यतावच्छेदकत्वेन पटसमवेतत्वस्यापि साध्यतावच्छेदकत्वादव्याप्तेरनुद्धारापत्तिरितिचेदत्र केचित् । अन्यकृता रीतिः प्रदर्शितत्वेन विशिष्टसाध्यतावच्छेदकतावच्छेदकस्थले साध्यतावच्छेदकतावच्छेदकतदितरोभयानवच्छिन्नत्वस्य प्रतियोगितावच्छेदकतायां निवेशितत्वेन पटनिरूपितत्वतदितरेण समवेतत्वनिष्ठप्रतियोगितावच्छेदकतावच्छेदकताया अवच्छेदात् तादृशाव्याप्तिवारणं सम्भवतीति । अतएव दण्डिमान्दण्डिसंयोगादित्यादौ तद्व्यक्तिवृत्तिदण्डत्ववद्दण्डीनास्तीति प्रतीतिसिद्धाभावमादायाव्याप्तिरिति पूर्वपक्षो निरस्तः, तत्राऽपि शुद्धसाध्यतावच्छेदकतावच्छेदककस्थले प्रतियोगितावच्छेदकतावच्छेदकतायां निरवच्छिन्नत्वनिवेशादित्याहुः ॥

अपरे तु अवच्छेदकतावच्छेदकसाधारणावच्छेदकतायाः स्वीकारेण यथोक्तस्थलद्वये पटनिरूपितत्वस्य तद्व्यक्तिवृत्तित्वस्य च साध्यतावच्छेदकतावच्छेदकेतरस्य प्रतियोगितावच्छेदकतावच्छेदकत्वात् तादृशाभावस्याव्याप्तिसम्पादकत्वाभावान्न काप्यनुपपत्तिरिति । न चावच्छेदकताव

च्छेदकसाधारणावच्छेदकतास्वीकारेण साध्यतावच्छेदकतदितरोभयानवच्छेद्यत्वनिवेशेनैव सर्वोपपत्तौ अवच्छेदकतायां शुद्धसाध्यतावच्छेदकस्थले निरवच्छिन्नत्वस्य विशिष्टसाध्यतावच्छेदकस्थले तादृशोभयानवच्छिन्नत्वस्य च वैयर्थ्यापत्तिरिति वाच्यं, प्रतियोगितानिरूपितावच्छेदकता नावच्छेदकसाधारणी किन्तु प्रतियोगितावच्छेदकता अवच्छेदकतावच्छेदकसाधारणीतिमते तादृशग्रन्थप्रतिपादनमित्याहुः ॥

अथ तद्वान्नास्तीतिप्रतीतिसिद्धाभावमादाय दण्डिमान्दण्डिसंयोगादित्यादौ व्याप्तिवारणमशक्यमेव तत्र दण्डनिष्ठावच्छेदकताया दण्डत्वानवच्छिन्नत्वेन तादृशोभयानवच्छिन्नत्वादितिचेदत्र वदन्ति। तादृशोभयानवच्छिन्नत्वपदेन साध्यतावच्छेदकतावच्छेदकेतरानवच्छिन्नत्वस्य विवक्षितत्वात्, विशिष्टसाध्यतावच्छेदकस्थलेऽपि निरवच्छिन्नघटत्वनिष्ठावच्छेदकताकाभावमादायैव लक्षणस्य सङ्गमनीयत्वेन क्षत्यभावात्. न च दण्डिमान्दण्डिसंयोगादित्यादौ अग्रे विवक्षणीयसाध्यतावच्छेदकताघटकसंयोगावच्छिन्नावच्छेदकताकाभावाप्रसिद्धिरिति वाच्यं, वह्नित्वप्रतियोगिकसमवायेन साध्यतावच्छेदकस्थले साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वाप्रसिद्धिभिया विवक्षणीयस्य साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वीयस्वरूपसम्बन्धावच्छिन्नावच्छेदकत्वाभावस्य निविष्टत्वेन क्षत्यभावात्। वस्तुतस्तु। साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकत्वं यथा निर्वाच्यं तथाऽवच्छेदकत्वस्य घटत्वादावपि सम्भवइति ॥

तत्ताया उपलक्षणत्वमङ्गीकृत्य जात्यखण्डोपाध्यतिरिक्त-दण्डादिनिष्ठावच्छेदकतायामपि निरवच्छिन्नत्वमङ्गीकृतं, दण्डत्वस्य व्यावर्तकत्वेन सुतरामुपलक्षणत्वमिति रीत्या दण्डादौ साध्ये इत्युत्थानं कृतं, अथ तत्ताया उपलक्षणत्वमतएव परम्परया दण्डत्वे साध्यतावच्छेदकत्वस्वीकार इति प्रणयने परम्परया दण्डत्वविशिष्टं तन्नास्तीतिप्रतीतिसिद्धाभावमादाय तत्राव्याप्तिर्दुर्वारैव, तत्ताया उपलक्षणत्वेन तादृशप्रतियोगितायाः साध्यतावच्छेदकतदितरोभयानवच्छिन्नत्वादितिचेद्‌-दत्रकश्चित् प्रतियोग्यंशे साक्षात् ज्ञातस्य उपलक्षणत्वंनांगीक्रियते किंतु अवच्छेदकांशे ज्ञातस्यैवेति नोक्तापत्तिरित्याह । तन्न अस्य रूपत्वन्यूनवृत्तिजातिमत्वात् रूपादित्यादावव्याप्तिदाने साध्यतावच्छेदके रूपत्वन्यूनवृत्तित्वविशेषणस्य वैयर्थ्यापत्तेः; तथाहि सत्तागुणत्वादिजातेरप्यनवच्छेदकत्वसंभवे नाव्याप्त्यभावेनाव्याप्तिसंपादकतया तादृशविशेषणं वक्तव्यं संगच्छते, तादृशविशेषणदानेऽपि रूपवति नीलो नास्ति पीतो नास्तीतिवत् नीलसन्नास्ति नीलगुणो नास्तीतिप्रतीतिसिद्धाभावमादाय सत्तागुणत्वादेरपि अवच्छेदकत्वसंभवेन तादृशविशेषणदानस्यानौचित्यापत्तेः, प्रतियोग्यंशे साक्षादभातस्याऽपि उपलक्षणत्वमंगीकार्यमिति सत्तादेरनवच्छेदकत्वे तादृशविशेषणं सार्थकमिति पूर्वकल्पे व्यावर्तकसाधारणस्य उपलक्षणस्यांगीकारः । यदिचेत्यादिकल्पे अव्यावर्तकस्य लक्षणत्वं न तु व्यावर्तकस्येति ग्रंथस्य तात्पर्यमिति दंडत्ववत्तन्नास्तीतिप्रतीतिसिद्धाभावमादायाव्याप्तेरनुद्धारादिति । परे तु यस्योपलक्षणत्वस्वीकारे अतिप्रसक्तधर्मे नावच्छेदकत्वस्वीकारस्तस्यैवोपलक्षणत्वं, तथा च प्रतियोग्यंशे भा-

तस्य तत्वस्य उपलक्षणत्वे अतिप्रसक्तस्य दंडत्वस्यावच्छेद-
कत्वस्योकारापत्तेरित्युपलक्षणत्वं तत्तायास्तत्र न सम्भवती-
ति प्राहुः ॥

विषयितया रूपत्ववज्ज्ञानाभावमादाय रूपवान्पृथि-
वीत्वादित्यादावव्याप्तिवारणार्थं साध्यतावच्छेदकताघटकसं-
बंधावच्छिन्नावच्छेदकत्वं निवेशितं, । न च तादृशरीत्या व-
न्हिमान्धूमादित्यादावव्याप्तिसम्भवे तत्स्थले त्यागानौचित्यमि
तिवाच्यं, अग्रे विवक्षणीयसाध्यतावच्छेदकसंबंधेन प्रतियो-
गिवैयधिकरण्यस्य संयोगेन ज्ञानाधिकरणाप्रसिद्ध्या न संभव
इति न च घटपटाद्यनुयोगिककालिकसंबंधेन वन्हित्वविशि-
ष्टस्याभावमादाय तत्राव्याप्तिर्भविष्यतीतिवाच्यं, विशेषरूपेण
संसर्गतानभ्युपगमात्, अत्र ज्ञानत्वस्य नावच्छेदकत्वकोटौ
निवेशो नातः प्रतियोगितायाः साध्यतावच्छेदकतदितरो-
भयानवच्छिन्नत्वहानिः, विषयितासंबंधेनापि रूपत्वादेः स्व-
रूपतो भानांगीकारेण च न वा तन्निष्ठावच्छेदकताया
निरवच्छिन्नत्वहानिः ॥

यद्यप्यवश्यं क्लृप्ताभिः पर्वतत्वचत्वरत्वादितत्तद्धर्मविशिष्ट-
धूमत्वावच्छिन्नाधिकरणताव्यक्तिभिरेव धूमवानिति प्रती-
त्युपपत्तौ समान्यधर्मावच्छिन्नाधिकरणतायां मानाभाव इति
जगदीशः । अथात्र पर्वतत्वविशिष्टधूमत्वावच्छिन्नाधिकर-
णतावगाहिप्रतीतौ पर्वतत्ववैशिष्ट्यं य यदि धूमे भासते तदा
तस्यैवावच्छेदकत्वनैवोपपत्तौ धूमत्वस्योपलक्षणतयैवोपचि-
तत्वेन धूमादिनिष्ठनिरूपकतानिरूपिताधिकरणताव्यक्ति-
भिरेव धूमवानितिप्रतीतेः प्रमात्वोपपत्तौ विशिष्टधूमत्वस्या-
वच्छेदकत्वकथनविरोधइति चेन्न एकधर्मावच्छिन्नधिकरण-

Indira Gandhi National
Centre for the Arts

तानामैक्यमते घटान्यत्वविशिष्टद्रव्यत्ववानितिज्ञानीयघटभेदावच्छिन्नधूमनिष्ठनिरूपकतानिरूपिताधिकरणताया ह्रदेऽपि सत्वात्तमादाय ह्रदो धूमवानितिप्रतीतेः प्रमात्वापत्तेरितिध्येयम्। यदि च समानाधिकरणवृत्तित्वसम्बन्धेन पर्वतत्ववैशिष्ट्यं धूमत्वे भासते तदा धर्मत्वस्यावच्छेदकत्वमेव तद्गतधर्मस्य विशेषणत्वे तस्योपलक्षणत्वाभावात् वैशिष्ट्यस्यावच्छेदकत्वं, अत एव तस्य विशेषणत्वादुपलक्षितपुच्छलग्नविशेषणानंगीकारात् ॥

अन्यत्र तादृशाधिकरणत्वाप्रसिद्ध्या तदभावस्याप्रसिद्धेः सिद्ध्यसिद्धिभ्यां तन्निषेधानुपपत्तेः, न च धूमत्वे अधिकरणतानिरूपकतावच्छेदकत्वाभावः साध्यइति वाच्यं, सामान्यतोऽधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वस्य यावत्वृत्तितया तदभावस्य सामान्यधर्मावच्छिन्नाधिकरणतावादिनापि स्वीकारात् सिद्धसाधनापत्तेः, न च पर्वतनिष्ठाधिकरणतायाः निरूपकतावच्छेदकतावच्छेदकत्वत्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वाभावएव धूमत्वगतैकत्वे साध्यत इतिवाच्यं, पर्वतेऽपि तादृशानंताधिकरणतायाः सत्वेन निरुक्तावच्छेदकत्वाभावसाधने सिद्धसाधनापत्तेः। न च तन्निष्ठयत्किंचिदधिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्न प्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वाभावएव साध्यते अतो न सिद्धसाधनमिति वाच्यं, यत्किंचित्वस्याननुगमात्, तन्निष्ठावयवादेर्यत्किंचिदधिकरणतामादायैव पुनः सिद्धसाधनतादवस्थ्यादिति चेन्न। अधिकरणतात्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्ननिरूपकत्तानिरूपितनिरूप्यतावन्निरू-

Indira Gandhi National
Centre for the Arts

पकतावच्छेदकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्या-
प्त्यनुयोगितावच्छेदकत्वाभावो धूमत्वनिष्ठैकत्वे साध्यते, व-
स्तुतस्तु अधिकरणताविशिष्टान्यत्वं धूमत्वनिष्ठैकत्वे सा-
ध्यते, वैशिष्ट्यं च स्वनिरूपितनिरूपकतावच्छेदकतात्वावच्-
छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकत्वसंबंधेन ग्राह्य-
मिति न कोऽपि दोष इति । नव्यास्तु सर्ववादिसिद्धायाः तत्तद-
धिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक-
पर्याप्तेरेव प्रसिद्धतया तत एवोपपत्तौ पर्याप्तेः सामान्यतो-
धिकरणतानिरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताक-
त्वस्यानंगीकारात्, तथाच धूमत्वनिष्ठैकत्वत्वे अधिकरणता-
निरूपकतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्याप्त्यनुयो
गितावच्छेदकत्वसामान्याभावएव साध्यतइत्यर्थएव ग्रंथ-
तात्पर्यमित्यवधेयम् । अथान्तसामान्यधर्मावच्छिन्नाधिकरण-
त्वाप्रसिद्धावपि हेतुतावच्छेदकनिष्ठावच्छेदकताकनिरूपक-
तानिरूपिताधिकरणतामादायैव वन्हिमान्धूमादित्यादौ ल
क्षणसमन्वयसंभवे किं तादृशपारिभाषिकत्वानुसरणेन न च
द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादौ हेतुतावच्छेदकी-
भूतसत्तात्वनिष्ठावच्छेदकताकनिरूपिकतानिरूपिताधिकर-
णत्वस्य गुणे सत्वात्तत्राव्याप्तिरिति वाच्यं हेतुतावच्छेद-
कताव्यापकनिरूपकतानिरूपिताधिकरणत्वस्य विवक्षितत्वा-
त् व्यापकत्वञ्च स्वावच्छेदकत्वसम्बन्धेन ग्राह्य मितिचेन्न ।
समानाधिकरणवृत्तित्वसम्बन्धेन गुणकर्मान्यत्वविशिष्टसत्ता-
त्वविशिष्टस्य हेतुतायां द्रव्यत्वादिसाध्यकेऽव्याप्तिवारणाय
हेतुतावच्छेदकताव्यापकनिरूपकतानिरूपिताधिकरणत्वस्य
विवक्षितत्वात् व्यापकत्वञ्च स्वावच्छेदकत्वसम्बन्धेन ग्राह्य-

मिति चेन्न। समानाधिकरणवृत्तित्वसम्बन्धेन गुणकर्मान्यत्व-
विशिष्टसत्तात्वविशिष्टस्य हेतुतायां द्रव्यत्वादिसाध्यकेऽव्याप्ति-
वारणाय हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकपर्या-
प्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्नानुयोगिताकपर्याप्ति-
कावच्छेदकताकनिरूपकताकाधिकरणत्वस्य विवक्षितत्वात्
अत्रावच्छेदकतावच्छेदकसाधारणावच्छेदकत्वं बोध्यं अन्य-
था तन्निवेशे तद्दोषतादवस्थ्यात् न चैतन्मते पूर्वकल्पेऽपि
उक्तस्थले नाव्याप्तिः हेतुतावच्छेदकताया गुणकर्मान्यत्वा-
दावपि सत्वेन तादृशनिरूपकताया हेतुतावच्छेदकत्वा-
व्यापकत्वादिति वाच्यं, तद्गुणकर्मान्यत्वस्य साध्यतायां स-
मानाधिकरणवृत्तित्वसम्बन्धेन तद्गुणतत्कर्मान्यत्वविशिष्टस-
त्तात्वस्य हेतुतायामव्याप्तिः तद्गुणतत्कर्मान्यत्वावच्छिन्नप्र-
तियोगिताकभेदविशिष्टसत्तात्वावच्छिन्नाधिकरणतावद्वृत्य-
भावप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वात्, ए-
वं धूमसमानकालीनद्रव्यत्वावच्छिन्नाधिकरणतामादाय व-
न्हिमान्धूमादित्यादावव्याप्तिश्च तथा च तादृशाधिकरणत्वाप्र-
सिद्धैव तत्राव्याप्तिसंगतिः। न च पर्वतत्वविशिष्टधूमत्वा-
वच्छिन्नाधिकरणतानिरूपकतावच्छेदकतायास्तद्व्यक्तित्वाव-
च्छिन्नप्रतियोगिताकपर्याप्त्यनुयोगितावच्छेदकं धूमत्वनिष्ठै-
कत्वं तदेव हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगिताकप-
र्याप्त्यनुयोगितावच्छेदकं पर्वतत्वविशिष्टधूमत्वावच्छिन्नाधि-
करणतामादायैव तत्र नाव्याप्तिरिति वाच्यं प्रतियोगितासम्ब-
न्धेन हेतुतायां महानसीयवन्ह्यभावभिन्नं वन्हेरित्यादाव-
व्याप्तेः निरुक्ताधिकरणताया महानसीयवन्ह्यभावेऽपि सत्वा-
त् अतस्तद्वारणाय हेतुतावच्छेदकतात्वावच्छिन्नप्रतियोगि-



Indira Gandhi National Centre for the Arts

ताकपर्याप्त्यनुयोगितावच्छेदकीभूतधर्मावच्छिन्नानुयोगिता-कपर्याप्तिप्रतियोगितावच्छेदकीभूतधर्मावच्छिन्ननिरूप्यतानिरूपितनिरूपकतावन्निरूपकतानिरूपिताधिकरणत्वस्य लक्षणघटकत्वात् तथा च तादृशाधिकरणत्वाप्रसिद्ध्यैव तत्राव्याप्तिसंगतिरिति ध्येयम् ॥

अथैवं हेतुतावच्छेदकीभूतधर्मे स्वाश्रयाधिकरणयन्निष्ठाधिकरणतानवच्छेदकत्वाभावविशिष्टाधिकरणतावच्छेदकत्वस्याभावस्तथाविधहेतुतावच्छेदकाश्रयाधिकरणत्वमेव हेतुतावच्छेदकावच्छिन्नाधिकरणत्वमित्यनेन कुतो न कृतमिति चेन्न यन्निष्ठाधिकरणतानवच्छेदकत्वमित्यत्राधिकरणत्वमवश्यं हेतुतावच्छेदकसम्बन्धेन ग्राह्यमन्यथा द्रव्यं गुणकर्मान्यत्वविशिष्टसत्वादित्यादावव्याप्तिर्विशिष्टसत्तात्वे कालिकसम्बन्धावच्छिन्नगुणनिष्ठाधिकरणतानवच्छेदकत्वस्यासत्वेन तादृशविशिष्टाभावस्य हेतुतावच्छेदके सत्वात्, एवं सामान्यतोधिकरणतावच्छेदकमित्यत्रापि अधिकरणत्वं हेतुतावच्छेदकसम्बन्धेन ग्राह्यमन्यथा वह्निमान्धूमादित्यादावव्याप्तिः पर्वतनिष्ठाधिकरणतानवच्छेदकत्वविशिष्टविषयित्वसम्बन्धावच्छिन्नाधिकरणतावच्छेदकत्वस्य धूमत्वे सत्वेन तादृशविशिष्टाभावासत्वात्, एवं सति धूमप्रतियोगिकसंयोगेन हेतुतायां पर्वतादिनिष्ठहेतुतावच्छेदकसम्बन्धावच्छिन्नाधिकरणतानवच्छेदकत्वविशिष्टाधिकरणतावच्छेदकस्याप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिरिति ध्येयम् पर्याप्तिनिवेशव्यावृत्तिश्चिन्तनीया ॥

अथात्र कल्पे सम्बन्धान्तरावच्छिन्नसामान्यधर्मावच्छिन्नाधिकरणत्वास्वीकारेऽपि विषयित्वसंबन्धावच्छिन्नाधिकरण-

त्वमवश्यं स्वीकरणीयमन्यथा विषयितया घटवानिति प्र-
तीतिर्यदि घटत्वनिष्ठावच्छेदकताकनिरूपकताकाधिकरण-
त्वान्यैवावगाहत इति विभाव्यते तदा घट इत्याकारकप्रती-
तावपि घटवानिति प्रतीत्यनुपपत्तेः। तथा च नित्यज्ञानभेदे
साध्ये विषयित्वसम्बन्धेन घटादिहेतावतिव्याप्तिः स्वाश्रया-
धिकरणीभूतनित्यज्ञाननिष्ठाधिकरणतानवच्छेदकतायाः कु-
त्राप्यसत्वात् यत्पदेन नित्यज्ञानव्यक्तेर्धर्तुमशक्यत्वेन ज्ञाना-
न्तरस्यैव धर्तव्यतया तन्निष्ठप्रतियोगिव्यधिकरणाभावप्रतियो-
गितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्वादिति चेन्न नि-
त्यज्ञानान्यत्वविशिष्टघटत्वादावेव तत्प्रसिद्धेरिति॥

अथ द्रव्यं घटत्वपटत्वोभयस्मादित्यादावतिव्याप्तिस्तादृश-
हेतुतावच्छेदकावच्छिन्नाधिकरणं पटो घटश्च तन्निष्ठाभावप्र-
तियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्वादिति चे-
न्न। हेतुतावच्छेदकपर्याप्त्यनुयोगितावच्छेदकीभूतयत्कि-
ञ्चिद्धर्मविशिष्टस्य यत्पदेन विवक्षितत्वादिति। वैशिष्ट्यं च स्वस-
मानाधिकरणभेदप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्व-
निष्ठावच्छेदकताकभेदवत्वसम्बन्धेन, अवच्छेदकत्वं च स्वनि-
ष्ठाधिकरणतानिरूपिताधेयत्वसम्बन्धेन, तथा च घटत्वपट-
त्वपर्याप्त्यवच्छेदकीभूतं तदुभयत्वं तादृशभेदवत्वसम्बन्धेन त-
द्विशिष्टसम्बन्धस्याप्रसिद्ध्या नातिव्याप्तिरिति॥

पूर्वकल्पे अनुगमप्रकारस्तु स्वनिष्ठभेदप्रतियोगिताव-
च्छेदकत्व—स्वाश्रयाधिकरणत्वोभयसम्बन्धेन प्रकृतहेतुताव-
च्छेदकविशिष्टत्वं अवच्छेदकत्वं च स्वनिष्ठावच्छेदकताक-
भेदवत्व—स्वसमानकालीनाधिकरणतानिरूपकतावच्छेदक-
त्वेतदुभयसम्बन्धेन स्वनिष्ठावच्छेदकत्वं च स्वनिष्ठाधिकरण-

तानिरूपकतावच्छेदकत्वसम्बन्धेन बोध्यम् । यद्वा स्वनिष्ठात्यंताभावप्रतियोगित्व—स्वाश्रयाधिकरणत्वोभयसम्बन्धेन हेतुतावच्छेदकविशिष्टत्वमेव हेतुतावच्छेदकावच्छिन्नाधिकरणेत्यनेन विवक्षितम्, प्रतियोगिकत्वं च निरुक्तोभयसम्बन्धेन बोध्यम् तेन धूमीयसंयोगेन धूमहेतुकस्थले निरुक्तोभयसम्बन्धेनावच्छेदकत्वाप्रसिद्धावपि न क्षतिरिति ध्येयम् । हेतुतावच्छेदकत्वं च नित्यज्ञानावृत्तिविषयिताशून्यज्ञानवृत्तिहेतुतावच्छेदकावच्छिन्नप्रकारतावच्छेदकत्वेन विवक्षणीयमित्यतो द्रव्यं घटत्वपटत्वोभयस्मादित्यादिहेतौ नाव्याप्तिरिति कश्चित् हेतुतावच्छेदकावृत्तिधर्मएव हेतुतावच्छेदकावच्छिन्नाधिकरणेत्यनेन विवक्षितः, वृत्तित्वं च स्ववृत्त्यभावप्रतियोगितावच्छेदकत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वसम्बन्धेनेत्यपि कश्चित् । परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृत्ते न संयोग इति नाध्यक्षमिति दीधितिः । परितः—सर्वावयवावच्छेदेन प्रतियोगिग्रहात्मकदोषाद्वेत्यर्थः न चैवमपि प्रतियोगिग्रहोत्पत्तिदशायां तत्प्रत्यक्षं दुर्वारम् प्रतियोग्युपलंभकसामग्र्या अपि दोषत्वोपगमादिति जगदीशः तस्यायमाशयः तत्पुरुषीयसंयोगाभावत्वावच्छिन्नलौकिकप्रकारताशालिप्रत्यक्षं प्रति तत्पुरुषीयसंयोगत्वावच्छिन्नलौकिकप्रकारताशालिज्ञानत्वेन प्रतिबन्धकत्वमनुभवसिद्धं प्रतिवध्यस्य विशेषणत्वं प्रतिबन्धकस्य विषयीभूतसंयोगवत्वं सम्बन्धः न च द्रव्ये संयोगाभावप्रत्यक्षस्य कस्याप्यनुत्पत्त्या ईश्वरज्ञानसाधारणज्ञानत्वेनैव प्रतिबन्धकत्वं युक्तं तथा च प्रतियोगिग्रहदशायां नापत्तिरितिवाच्यं,तथासति परितः प्रतियोग्युपलब्धेर्दोषाद्वेत्यनेन दोषोत्कीर्तनस्य वैफल्यापत्त्या तादृशरीतिमनुरुद्ध्य भ-

Indira Gandhi National Centre for the Arts

द्याचार्यव्याख्यानस्यानुपादेयत्वादिति दिक् ॥

यो यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववान्स तज्जात्यवच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववानिति जगदीशेनोक्तम्। न चात्र यज्जातिसमानाधिकरणोभयावृत्तिप्रतियोगिताकयावद्विशेषाभाववत्त्वस्य सम्यक्त्वे उभयावृत्तिधर्मावच्छिन्नत्वनिवेशवैयर्थ्यमितिवाच्यं, स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः प्रतिव्यक्तिभेदेन भिन्नतया सत्तागुणत्वावच्छिन्नाभावमादाय स्वरूपासिद्धिप्रसंगात्। न च तथापि प्रतियोगितासम्बन्धेन यज्जातिसमानाधिकरणोभयावृत्त्यभाववत्त्वस्य हेतुत्वसंभवे तन्निवेशस्य वैयर्थ्यमिति वाच्यं, समनियताभावयोरैक्यमते व्यभिचारापत्तेः, तद्घटीयरूपरसादेः समानकालोत्पन्नविनष्टस्य योऽभावस्तस्य रूपत्वसमानाधिकरणोभयावृत्त्यभावानंतर्गततया तदन्ययावद्विशेषाभावस्य तद्घट एव सत्त्वेन तत्र रूपत्वावच्छिन्नाभावासत्त्वादिति ॥

जात्युपादानात् गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेऽपि न व्यभिचार इति जगदीशः। अत्र यद्धर्मसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववृत्तियावत्त्वस्यानुगतानतिप्रसक्तधर्मान्तरेण निवेशयितुमशक्यत्वेन तादृशाभावत्वव्यापकत्वेन निवेश एव कार्यः तादृशव्यापकत्वं च तादृशाभावत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वाभावरूपं वाच्यं, तथा च कंबुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावत्वसमानाधिकरणभेदप्रतियोगितावच्छेदकतात्वमपेक्ष्य घटत्वसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावत्वस-

Indira Gandhi National Centre for the Arts

मानाधिकरणभेदप्रतियोगितात्वस्य लघुतया तादृशाभावाप्रसिद्धैरत्र यत्पदेन कंबुग्रीवादिमत्वस्य धर्तुमशक्यत्वात् जात्युपादानवैयर्थ्यमिति चेन्न। व्याप्यतासम्बन्धेन जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नप्रतियोगिताकाभाववत्ववृत्तित्वेन यावत्वस्य निवेशात्, व्याप्यत्वं च स्वाभाववद्वृत्तित्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वरूपं ग्राह्यं तथा च तादृशाभावाप्रसिद्धावपि तादृशनिखिलाभाववृत्तिसमुदायत्वस्य तादृशाभावत्ववृत्तित्वेन ग्रहीतुं शक्यतया यद्धर्मदेन कंबुग्रीवादिमत्वमादाय व्यभिचारबारणाय तत्सार्थक्यात्॥

यो यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववान् स तज्जात्यवच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववानिति व्याख्यायां जातिपदोपादानात् कंबुग्रीवादिमत्वसमानाधिकरणोभयावृत्तितत्तद्घटत्वावच्छिन्नप्रतियोगिताकाभाववति भूतलादौ तदवच्छिन्नप्रतियोगिताकाभावाप्रसिद्ध्या न व्यभिचार इति जगदीशोक्तं। अत्र यद्यपि साध्याप्रसिद्धिरेव न व्यभिचारः तथापि साध्याप्रसिद्धिरित्येव क्वचित्पाठः साध्याप्रसिद्धिरेव तल्लक्षणाभिप्रायेण, तथाहि यद्धर्मसामानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकयावदभावाधिकरणकं तत्तदधिकरणनिष्ठतादृशाभावप्रतियोगितावच्छेदकमित्यत्र तादृशसाध्यप्रसिद्ध्या कंबुग्रीवादिमत्वादौ व्यभिचारो दर्शितः अथवा यो यज्जातिसमानाधिकरणोभयावृत्तिधर्मावच्छिन्नयत्सम्बन्धावच्छिन्नप्रतियोगिताकयावदभाववान्स तज्जात्यवच्छिन्नतत्सम्बन्धावच्छिन्नप्रतियोगिताकाभाववत्वसम्बन्धेन तद्वानित्यर्थं एव तात्पर्यं, तथा च साध्या-

Indira Gandhi National Centre for the Arts

भाववद्वृत्तित्वरूपव्यभिचारस्यैव सम्यक्त्वान्न कोपि दोषः ॥

तत्रेदं बोध्यं संयोगी द्रव्यत्वादित्यादौ लक्षणघटकप्रतियोगिवैयधिकरण्यदलव्यावृत्त्यर्थं संयोगाभावस्य प्रत्यक्षासंभवेन एतादृशव्याप्त्या एतदनुमीयते तत्र यद्यपि तादृशव्याप्त्या संयोगाभावस्यानुमितिरपि व्याप्तिलक्षणे प्रतियोगिवैयधिकरण्यं विनापि न संभवति संयोगाभावाभावस्य यावद्विशेषाभावाधिकरणे वृक्षादौ सत्वेन संयोगाभावत्वरूपसाध्यतावच्छेदकस्य व्यापकतावच्छेदकत्वविरहात् अतस्तदर्थं प्रतियोगिवैयधिकरण्यनिवेश आवश्यकः तथा च येन प्रकारेण तस्य संगतिस्तथैव तस्य प्रयोजनसत्त्वेन संदर्भविरोधः स्यात् तथाऽपि सामान्यव्याप्तौ प्रसिद्धस्थले व्यापकसामानाधिकरण्यरूपव्याप्तेरनुमानांगत्वमसिद्धस्थले वृक्षादौ संयोगाभावादिसाधने साध्यसाधनसहचारमात्रमितिमिश्रादिभिरप्युक्तमित्यतो न संदर्भविरोधः स्यादित्यास्तां विस्तरः ॥

शब्दो नित्यः सामान्यवत्वे सति विशेषगुणांतरासमानाधिकरणबहिरिंद्रियग्राह्यत्वादित्यादिहेतौ नित्यत्वे साध्ये सामान्यवत्वविशेषणस्य शब्दध्वंसे व्यभिचारवारणाय सार्थक्यं, विशेषगुणान्तरासमानाधिकरणविशेषणस्य रूपादौ व्यभिचारवारणाय सार्थक्यं लौकिकप्रत्यक्षविषयतार्थकस्य बहिरिंद्रियग्राह्यत्वदलस्य मनःक्रियादौ भिचारवारणाय सार्थक्यं,एतन्मते ध्वन्यात्मकशब्दे व्यभिचारवारणाय पुनर्हेतौ ध्वनिभिन्नत्वं विशेषणं देयम् अनित्यत्वे साध्ये सामान्यवत्वविशेषणस्य शब्दत्वे व्यभिचारवारणाय सार्थक्यं, गगनादौ व्यभिचारवारणाय बहिरिंद्रियग्राह्यत्वदलसार्थक्यं, न च ग्राह्यांतशब्दांशतः स्वरूपासिद्धिरिति वाच्यं, सामान्यवत्वे सति बहिरि-

द्रियग्राह्यत्वादिति दलद्वयस्य बहिरिंद्रियग्राह्यतावच्छेदक-जातिमत्वरूपार्थकत्वेन वारणात् पुनर्गगनादौ द्रव्यत्वजा-तिमादाय व्यभिचारणाय तादृशजातौ हींद्रियाग्राह्यतानव-च्छेदकत्वविशेषणंदेयम् एवं च जलीयपरमाणुरूपे व्यभि-चारवारणाय विशेषगुणांतरासामानाधिकरण्यदलसार्थक्यं चात्मन्यात्मत्वजातिमादाय व्यभिचारवारणाय बहिः पदम् । अनित्यत्वपक्षे बहिरिन्द्रियग्राह्यत्वस्य लौकिकप्रत्यक्षविषय-त्वरूपं नार्थ,ः । अथान्तरपदस्य स्वरूपासिद्धिवारकतया सा-र्थकत्वमुक्तं तन्न संगच्छते ह्येत्वप्रसिद्धिवारकतयैव सार्थक्या-दिति चिंतनोयम् ॥

यद्वा यो यदीयानां यद्धर्मावच्छिन्नप्रतियोगित्वानां यावतां विशेषाभाववान्प्रत्येकावच्छिन्नाभाववानित्यर्थः तथा च संयो-गत्वावच्छिन्नप्रतियोगिताव्यक्तीनां प्रत्येकावच्छिन्नाभावकूट-वत्वंस्य पक्षे सत्वान्नासिद्धिर्न वा व्यर्थविशेषणत्वमिति जगदी-शः ॥

न चात्रापि प्रत्येकपदस्य स्वरूपासिद्धिवारकतया तद्दोष-तादवस्थ्यमिति वाच्यं, यद्धर्मावच्छिन्नप्रतियोगित्वानां प्रत्ये-कावच्छिन्नाभाववानित्यनेन तादृशप्रतियोगितानिष्ठावच्छे-दकताकाभाववत्वस्यैव विवक्षितत्वात्, न च संयोगत्वावच्-छिन्नप्रतियोगी नास्तीति प्रतीतिसिद्धाभावमादाय पक्षे स्व-रूपासिद्धिरितिवाच्यं, तादृशाभावप्रतियोगितावच्छेदकत्व स्य लाघवेन संयोगत्व एव कल्पनीयत्वादिति न च तत्तत्प्र-तियोगित्वावच्छिन्नाभावप्रतियोगितावच्छेदकं तत्तत्संयोगा-दिनिष्ठतत्तद्व्यक्तित्वमेव लाघवात् न तत्तत्प्रतियोगित्वं त-था च संयोगत्वावच्छिन्नप्रतियोगितानिष्ठावच्छेदकताकप्रति-

योगिताकाभावाप्रसिद्ध्या हेत्वप्रसिद्धिरिति वाच्यं, जगदीशेन जातीतरस्य स्वरूपतो भानांगीकारात् स्वरूपतस्तु तत्प्रतियोगित्वस्यैवाच्छेदकत्वस्वीकारात् तदपेक्षया तद्वृत्तित्वस्यावच्छेदकत्वकल्पनेन लाघवानवकाशादिति । अथात्र प्रतियोगित्वनिष्ठावच्छेदकत्वं स्वरूपसम्बन्धावच्छिन्नं ग्राह्यमन्यथा कालिकसम्बन्धावच्छिन्नप्रतियोगित्वनिष्ठावच्छेदकताकप्रतियोगिताकाभाववत्वस्य वृक्षादावसत्वेन स्वरूपासिद्धिप्रसंगः न चात्रापि स्वरूपासिद्धिवारकविशेषणस्य वैयर्थ्यमिति वाच्यं, यत्किञ्चित्सम्बन्धावच्छिन्नावच्छेदकत्वघटितलक्षणे व्यर्थविशेषणत्वाभावादिति । वस्तुतस्तु यद्धर्मावच्छिन्नप्रतियोगिताव्यापकसमुदायत्वविशिष्टाभाववत्वमेव, हेतुः व्यापकत्वं च स्वाश्रयाभावप्रतियोगितावच्छेदत्वसम्बंधेन वोध्यमिति ॥ न चाभिघातत्वसमानाधिकरणतत्तदभिघातत्वावच्छिन्नाभाववति वृक्षे ऽभिघातसामान्याभावरूपसाध्यवति निरवच्छिन्नवृत्तिकत्वविशिष्टाभिघातयावद्विशेषाभावसत्वेनोपाधेः साध्याव्यापकत्वमिति वाच्यं । गुणविभाजकजातेरेव हेतुसाध्ययोः प्रविष्टत्वादिति जगदीशेनोक्तं तन्न संगच्छते, उपाधिदानार्थं गुणविभाजकजातिनिवेशस्यासंगतत्वादिति चेन्न । गुणविभाजकजात्यवच्छिन्नाभावसाध्यकानुमाने उपाधिसत्वेन गुणविभाजकजात्यवच्छिन्नाभावस्य पक्षावृत्तित्वासिद्धौ सामान्यतो जात्यवच्छिन्नाभावसाध्यकानुमानस्य निरुपाधित्वेऽपि तद्बलात् विशेषबाधेन सामान्यसिद्धौ सिद्धसाधनापत्तेर्दुर्वारत्वादेवं सति संयोगत्वावच्छिन्नाभावसाध्यकानुमाने उपाधिदाने संयोगाभावे तदभावसिद्धौ सिद्धसाधनापत्तिसंभवे गुणविभाजकपर्यंतप्रवेशो हयेति विभाव-

Indira Gandhi National Centre for the Arts

नीयं न च घटाद्यवच्छेदेन ज्ञानादिसाध्याभाववत्यात्मनि निरवच्छिन्नवृत्तिकतदीययावद्विशेषाभावासत्त्वादुपाधेः साध्याव्यापकत्वमिति वाच्यं, साध्यघटकगुणविभाजकजातेः सविषयकावृत्तित्वेनापि विशेषणीयत्वादिति ध्येयम् ॥ इदं तु चिंत्यते वक्ष्यमाणत्वादिकल्परूपाद्यवृत्तित्वेन जातिविशेषणेनैव सामंजस्ये तत्कल्पस्य परित्यागानौचित्यमिति ॥

यत्त्वेकावच्छेदेनेत्यस्य परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टेत्यर्थमाह तच्चिंत्य मिति जगदीशः, तस्यायमाशयः निरवच्छिन्नवृत्तिकत्वविशिष्टतदीययावद्विशेषाभाववत्त्वस्योपाधित्वे कपिसंयोगाभावसाध्योपाधिसाध्यव्याप्तौ व्यभिचारमाशंक्य गुणविभाजकजात्यवच्छिन्नाभावनिवेशनं कृतं जगदीशेन एतन्मते परस्परानवच्छेदकानवच्छिन्नवृत्तिकत्वविशिष्टकपिसंयोगीययावद्विशेषाभाववत्त्वस्य पक्षे सत्त्वान्न व्यभिचारः स्वावच्छेदकत्वसम्बन्धावच्छिन्नावच्छेदकताकभेदवत्त्व—स्वप्रतियोग्यधिकरणसमवेतत्वोभयसम्बन्धेन यत्किंचिद्विशेषाभावविशिष्टधर्मानवच्छिन्नवृत्तिकत्वविशिष्टतदीययावद्विशेषाभाववत्त्वमुपाधिरिति ॥

नोपादेयं च सर्वथैव व्याप्यवृत्तिसाध्यके साध्यसाधनभेदेन व्याप्तेर्भेदादिति दीधितिः, एतद्व्याख्यानप्रस्तावे सत्तावान् जातेरित्यादावव्याप्तिवारणन्तु अभावे विशेषणताविशेषसम्बन्धावच्छिन्नवृत्तित्वनिवेशादेव संभवति द्रव्यत्वशून्यं सत्त्वादित्यादौ द्रव्यत्वरूपसाध्याभावस्य विशेषणतया वृत्तित्वविरहात् द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यापि द्रव्यत्वानतिरेकात्तत्राव्याप्तिरिति जगदीशः अथ द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यातिरिक्तत्वेऽपि तत्प्रतियोगितानवच्छेदकत्वस्य

Indira Gandhi National Centre for the Arts

वच्छेदके सत्वादतिव्याप्तिनिरासात्तादृशाभावस्यातिरिक्तत्व-खंडनस्यानौचित्यं जगदीशस्येति चेन्न। द्रव्यभिन्नत्वाभावस्य अतिरिक्ताभावे कल्पनामपेक्ष्य द्रव्यत्वस्वरूप एव कल्पयितुमुचितत्वेन क्लृप्तद्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावेऽपि कल्पयितुमशक्यतया विशेषणताविशेषसम्बन्धेन वर्तमानस्य तादृशाभावच्छेदकमेव साध्यतावच्छेदकमतो नातिव्याप्तिरित्याशंक्य द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्यातिरिक्तत्वं खंडयति द्रव्यभिन्नत्वप्रकारकप्रमाविशेष्यत्वेति अतो न क्वचिदनुपपत्तिरिति। केचित्तु तदवच्छिन्नाभाववद्वृत्त्वविशिष्टसामान्यकत्वमिति पारिभाषिकत्वलक्षणाभिप्रायेणेदमिति चेन्न। तद्वृत्तिरूपध्वंसाभावाभावमादायातिव्याप्तिवारणसंभवे तद्ग्रंथासंगतेरिति॥

तथापि साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगिमत्ताबुद्धिविषयविधया प्रतिबन्धकतावच्छेदको यः सम्बन्धस्तेन हेत्वधिकरणवृत्तित्वमभावस्य विवक्षितमिति जगदीशः। तस्यायमर्थः साध्यतावच्छेदकसम्बन्धावच्छिन्नस्वप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबन्धक--तावच्छेदकीभूतप्रकारतावच्छेदकसम्बन्धेन तत्वमिति फलितं। नन्वत्र साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वनिवेशो व्यर्थ इति वाच्यं विषयितासम्बन्धेन घटाभावविशिष्टभेदे साध्ये घटाभावविषयकज्ञानत्वादित्यादावव्याप्तेः स्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य घटाभावानतिरिक्ततया कालिकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रकारताशालिज्ञानत्वावच्छिन्नप्रतिबध्य-

Indira Gandhi National Centre for the Arts

साधयतानिरूपितप्रतिबन्धकतावच्छेदकीभूता या कालिकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावत्वावच्छिन्नप्रकारता तदवच्छेदकीभूतविशेषणता विशेषसम्बन्धेन साध्यतायां गगनत्वादिहेतावव्याप्तिः साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्यापि साध्यतावच्छेदकसम्बन्धेन स्वप्रतियोगितावच्छेदकीभूतघटत्ववत्त्वबुद्धेः प्रतिबन्धकतावच्छेदकीभूतविशेषणताविशेषेण हेत्वधिकरणवृत्तित्तया तदवच्छेदकत्वस्य साधयतावच्छेदके सत्वादिति वाच्यं, साध्यतावच्छेदकसम्बन्धेन यादृशप्रतियोगितावच्छेदकावच्छिन्नवत्ताबुद्धेः प्रतिबन्धकतावच्छेदकप्रकारतावच्छेदकसम्बन्धेन हेत्वधिकरणवृत्तित्वं यदभावस्य तदभावीयतादृशप्रतियोगितानवच्छेदकत्वस्य साधयतावच्छेदके विवक्षितत्वात् अथवा स्वनिरूपितप्रतियोगितावच्छेदकावच्छिन्नसाधयतावच्छेदकसम्बन्धावच्छिन्नप्रकारत्वावच्छिन्नप्रतिबधयतानिरूपितप्रतिबन्धकतावच्छेदकीभूतस्वावच्छिन्नप्रकारतावच्छेदकसम्बन्धावच्छिन्नहेत्वधिकरणवृत्तितावच्छेदकीभूतं यदनुयोगित्वं तन्निरूपितप्रतियोतानवच्छेदकत्वस्य विवक्षितत्वात् स्वमनुयोगित्वमितिध्येयम् ॥

वस्तुतो व्याप्यवृत्तित्वमत्र साधयतावच्छेदकसम्बन्धेन साधयवद्वृत्तिसाधयतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रतियोगित्वमिति जगदीशः, अत्रेदं चिन्त्यते विषयितासंम्बन्धेन गगनवह्निदस्य साधयत्वे प्रमेयत्वादिहेतावतिव्याप्तिः स्वाश्रयसमवेतनित्यभिन्नत्वसम्बन्धेन रूपवह्निदस्य साधयतायां नित्यरूपगगनान्यतरत्वादिहेतावतिव्याप्तिश्च वि-

शेषगताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकसाध्याभावस्य हेत्वधिकरणवृत्त्यभावान्तरप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके सत्वादिति मैवं साध्यतावच्छेदकसम्बन्धेन साध्यवत्ताग्रहविरोधितावटकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व—साध्याभावनिष्ठत्वैतदुभयाभाववद्धेत्वधिकरणसम्बन्धितावदभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वादिति । वस्तुतस्तु वृत्त्यनियामकसम्बन्धावच्छिन्नत्व—साध्याधिकरणनिरूपितत्वोभयाभाववद्धेत्वधिकरणसम्बन्धितावदभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वान्न दोष इति ध्येयं ॥ अथ अभावाधिकरणकाभावस्याधिकरणस्वरूपत्वे व्याप्यवृत्तिसाध्यकस्थलीयलक्षणे घटत्वाभाववान् पटत्वादित्यादौ साधनसमानाधिकरणसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावात्मकसाध्यभेदीयप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वादव्याप्तिरतस्तद्वारणाय साधनसमानाधिकरणाभावीयात्यन्ताभावत्वनिरूपकप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके वाच्यं तथा सति तन्मते घटत्वाभावस्य संयोगसम्बन्धावच्छिन्नप्रतियोगिताकोयोऽभाव स्तस्यापि घटाद्यभावस्वरूपतया साधनसमानाधिकरणघटाद्यभावस्य संयोगसम्बन्धावच्छिन्नप्रतियोगिताकघटत्वाभावस्वरूपात्यन्ताभावत्वनिरूपकप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वेन पुनः तत्रैवाव्याप्तिरतस्तद्वारणाय साधनसमानाधिकरणाभावीयात्यन्ताभावत्वनिरूपकसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके वाच्यं तथा च द्रव्यं गौः सास्नाया इत्यादौ साधनसमानाधिकरणाभावीयात्यन्ता-

भावत्वनिरूपकप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाप्रसिद्ध्या ऽव्याप्तिसम्भवे इदमप्यभाववृत्त्यभावो नाधिकरणस्वरूप इत्यपि जगदीशग्रन्थासङ्गतिरिति चेन्न। व्याप्यवृत्तिसाध्यकस्थलीयलक्षणे प्रतियोगितायां अत्यंताभावत्वनिरूपकत्वमपहाय साधनसमानाधिकरणात्यंताभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वादिति। न च घटाद्यभावस्य तादात्म्येन साध्यतायां तद्वद्भिन्नत्वादिहेतावव्याप्तिः साधनसमानाधिकरणघटत्वाभावात्मकघटभेदस्य साध्यभेदात्मकतया तदीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदके सत्वादिति वाच्यं हेतुसमानाधिकरणाभावीयहेत्वधिकरणवृत्तितावच्छेदकीभूतानुयोगितानिरूपितसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वाद दोष इति। तथा चाभाववृत्त्यभावस्याधिकरणस्वरूपत्वे नाव्याप्तिसम्भव इति ध्येयम्॥ स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यद्धेत्वधिकरणं तद्वृत्त्यभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव साध्यतावच्छेदके विवक्षणीयं तथा च सद्धेतुस्थल इव द्रव्यत्वाभाववान्सत्वादित्यत्रापि घटाद्यभाव एव प्रतियोगिव्यधिकरण इति जगदीशः। अत्रेयमापत्तिः पूर्वक्षणवृत्तित्वविशिष्टघटाद्यभावाभाववान् पटत्वादित्यादावव्याप्तिः स्वीयं घटनिष्ठं यत्प्रतियोगित्वं संयोगसम्बन्धावच्छिन्नं संयोगेन प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यत्पटादि तद्वृत्तिघटाभा-

बीयसाध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नपूर्वक्षणवृत्तित्व-
विशिष्टघटाभावाभावनिष्ठप्रतियोगिताया अवच्छेदकत्वस्य
साध्यतावच्छेदके सत्वात्, न च हेतुमद्वृत्तितावच्छेदकानु-
योगितानिरूपितत्वं पटवृत्तित्वविशिष्टघटाभावत्वस्वरूपानु-
योगितैव तन्निरूपितत्वं पटवृत्तित्वविशिष्टघटाभावनिष्ठप्र-
तियोगितायामेव न तु साध्यतावच्छेदकीभूतविशेषणता-
विशेषसम्बन्धावच्छिन्नपूर्वक्षणवृत्तित्वविशिष्टघटाभावाभाव-
निष्ठप्रतियोगितायामतो नाव्याप्तिरिति वाच्यं कपिसंयो-
गविशिष्टघटाभावाभाववानेतद्वृक्षत्वादित्यादावव्याप्तिः न च
कपिसंयोगविशिष्टघटाभावाभावस्यापि एतद्वृक्षे सत्वात् क-
थं कपिसंयोगविशिष्टघटाभावाभावसाध्यके एतद्वृक्षत्वादिकं
सद्धेतुरिति वाच्यं, कपिसंयोगस्याव्याप्यवृत्तित्वेन वृक्षे क-
पिसंयोगविशिष्टघटाभावाभावस्यापि मूलावच्छेदेन सत्वा-
द्विशेषणस्याव्याप्यवृत्तितया विशिष्टस्यापि अव्याप्यवृत्तित्व-
स्य ग्रंथकृतैव व्याप्तिग्रहोपाये विवक्षितत्वात्। स्वीयघ-
टनिष्ठप्रतियोगित्वं संयोगसंबन्धावच्छिन्नं संयोगेन प्रतियो-
गितावच्छेदकावच्छिन्नसामान्यानधिकरणं यद्धेत्वधिकरणं
वृक्षादि तद्वृत्तितावच्छेदकीभूतकपिसंयोगविशिष्टघटाभावा-
भावत्वस्वरूपानुयोगितानिरूपितसाध्यतावच्छेदकीभूतवि-
शेषणताविशेषसम्बन्धावच्छिन्नकपिसंयोगविशिष्टघटाभावा-
भावनिष्ठप्रतियोगिताया अवच्छेदकत्वस्य साध्यतावच्छेद-
ककपिसंयोगविशिष्टघटाभावाभावत्वे सत्वादनधिकरणान्त-
स्य वैयर्थ्यभयेन हेत्वधिकरणवृत्तितायां निरवच्छिन्नत्वस्य
निवेशासम्भवात्। न च हेतुमद्वृत्तितावच्छेदकत्वे सति नि-
रवच्छिन्नवृत्तितावच्छेदकत्वमप्यनुयोगिताविशेषणं देयम्।

Indira Gandhi National
Centre for the Arts

तथा च कपिसंयोगविशिष्टघटाभावस्य सर्वत्राव्याप्यवृत्तितया कपिसंयोगविशिष्टभावत्वरूपानुयोगितताया निरवच्छिन्नवृत्तितावच्छेदकत्वविरहादेवाव्याप्तिरुद्धारस इति वाच्यं कपिसंयोगाभावविशिष्टघटाभाववानेतद्वृक्षत्वादित्यादावव्याप्तिप्रसङ्गात् गुणपरमाणुनिरूपितनिरवच्छिन्नवृत्तिताया अवच्छेदकत्वस्य साध्याभावत्वे सत्वात्, अत्र केचित् स्वीययन्निष्ठप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यद्वेत्वधिकरणं तद्वृत्तिसाध्यतावच्छेदकसम्बन्धावच्छिन्नाभावीयतन्निष्ठप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके विवक्षितत्वात् तथा स्वीयघटनिष्ठप्रतियोगित्वं संयोगसम्बन्धावच्छिन्नं संयोगेन प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं पटादि तद्वृत्तिसाध्यतावच्छेदकविशेषणताविशेषसम्बन्धावच्छिन्नपूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावनिष्ठप्रतियोगिताकाभावीया या घटनिष्ठप्रतियोगिता तदनवच्छेदकत्वस्य साध्यतावच्छेदके सत्वात् न तत्राव्याप्तिः न च घटाभाववानात्मत्वादित्यादावव्याप्तिर्घटाभावनिष्ठप्रतियोगित्वं कालिकसम्बन्धावच्छिन्नं कालिकेन प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यद्धेत्वधिकरणं आत्मत्वादि तद्वृत्तिसाध्यतावच्छेदकविशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकस्य पूर्वक्षणवृत्तित्वविशिष्टस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावाभावाभावाभावस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाभावाभावतया तदीया या घटाभावनिष्ठा प्रतियोगिता तदवच्छेदकत्वस्य साध्यतावच्छेदके सत्वादिति वाच्यं अभावे साध्यतावच्छेदकसम्ब-

न्धावच्छिन्नप्रतियोगिताकत्वमपहाय प्रतियोगितायां साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्व—साध्यनिष्ठत्वोभयाभावस्य विवक्षणीयत्वात् तथा च घटाभाववाना-त्मत्वादित्यादौ तादृशहेत्वधिकरणवृत्त्यभावीयघटाभावनिष्ठ-प्रतियोगितायां साध्यतावच्छेदकसम्बन्धातिरिक्तकालिकसम्बन्धावच्छिन्नत्व—साध्यनिष्ठत्वोभयसत्त्वेन तत्प्रतियोगिताया लक्षणाघटकत्वान्नाव्याप्तिः पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभाववान् पटत्वादित्यादौ घटनिष्ठप्रतियोगितायां साध्यनिष्ठत्वविरहेणोभयाभावसत्त्वात् तत्तत्प्रतियोगितामादायैव लक्षणसमन्वय इत्याहुः। केचित्तु हेतुसमानाधिकरणाभावीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगितायां स्वप्रतियोगितावच्छेदकयादृशसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणं यद्धेत्वधिकरणं तादृशसम्बन्धानवच्छिन्नत्वोभयाभावस्य विशेष्यताविशेषसम्बन्धावच्छिन्नत्व—साध्यतावच्छेदकावच्छिन्नत्वोभयाभावस्य विवक्षणीयत्वात् तथा च पूर्वक्षणवृत्तित्वविशिष्टघटाभाववान्पटत्वादित्यादौ संयोगादिसम्बन्धावच्छिन्नपटाभावीयपूर्वक्षणवृत्तित्वविशिष्टपटाभावाभावनिष्ठप्रतियोगितैव लक्षणघटिकेत्यप्याहुः॥ नव्यास्तु साध्यतावच्छेदकसम्बन्धानवच्छिन्नत्व—साध्याभावनिरूपितत्वोभयाभाववत्प्रतियोगित्वस्य स्वप्रतियोगित्वपदेन विवक्षितत्वात्तथा च संयोगसम्बन्धावच्छिन्नघटनिष्ठप्रतियोगितायां साध्यतावच्छेदकसम्बन्धानवच्छिन्नत्व—पूर्वक्षणवृत्तित्वविशिष्टघटाभावाभावरूपसाध्याभावनिरूपितत्वोभयसत्त्वेन लक्षणाघटकत्वात् पूर्वक्षणवृत्तित्वविशिष्टघटाभावात्मकस्य घटाभावानतिरिक्तत्वात्॥ न च द्रव्यत्वाभा-

Indira Gandhi National Centre for the Arts

वस्य विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकाभाव एव द्रव्यभिन्नानुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोऽपि तथा च द्रव्यत्वाभावनिष्ठं यद् द्रव्यभिन्नानुयोगिकस्वरूपसम्बन्धावच्छिन्नं प्रतियोगित्वं तत्साध्यतावच्छेदकस्वरूपसम्बन्धावच्छिन्नत्व—साध्याभावनिरूपितत्वोभयाभावसत्वेन स्वप्रतियोगितावच्छेदकद्रव्यभिन्नानुयोगिकस्वरूपसम्बन्धेन तादृशप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वस्य हेत्वधिकरणे द्रव्यत्वस्वरूपस्य साध्याभावस्य लक्षणाघटकत्वात् कथं द्रव्यत्वाभाववान्सत्त्वादित्यादावतिव्याप्तिरिति वाच्यं, यत्राऽऽत्मत्वप्रकारकप्रमाविशेष्यत्वस्य तदात्मानुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकोऽभावः तस्य कालिकसम्बन्धावच्छिन्नप्रतियोगिताकतदभावस्य दैशिकविशेषणतया साध्यतायां आत्मत्वं हेतुस्तत्र सद्धेतौ हेत्वधिकरणे आत्मनि वर्तमानो यस्तदात्मानुयोगिकविशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्तत्प्रतियोगित्वं तदात्मानुयोगिकविशेषणताविशेषसम्बन्धावच्छिन्नत्वं तेन तदभावप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणहेत्वधिकरणवृत्तिर्यस्तदनुयोगिकस्वरूपसम्बन्धावच्छिन्नप्रतियोगिताकात्मत्वप्रकारकप्रमाविशेष्यत्वाभावस्तदीयसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रकृतसाध्यनिष्ठा या प्रतियोगिता तदवच्छेदकत्वस्य साध्यतावच्छेदके सत्वादव्याप्तिस्तद्वारणार्थं साध्यतावच्छेदकसंसर्गतावच्छेदकेतरावच्छिन्नसंसर्गतानिरूपितत्व—साध्याभावनिरूपितत्वोभयाभाववत्प्रतियोगित्वस्य स्वप्रतियोगित्वपदेन विवक्षितत्वात् तथा च तदात्मानुयो-

Indira Gandhi National
Centre for the Arts

गिकविशेषणताविशेषसम्बन्धावच्छिन्नात्मत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगितायाः साध्यतावच्छेदकेतरसंसर्गतावच्छेदकेतरतदात्मानुयोगिकत्वावच्छिन्नसंसर्गतानिरूपितत्व—साध्याभावनिरूपितत्वोभयसत्वेन लक्षणाघटकत्वं किन्तु घटाद्यभावीयप्रतियोगितायामेव तथात्वं, तस्याः साध्यतावच्छेदकेतरसंयोगत्वावच्छिन्नसंसर्गतानिरूपितत्वेऽपि साध्याभावनिरूपितत्वाभावसत्वेन तादृशोभयाभावसत्वात्, तथा च द्रव्यत्वाभाववान्सत्वादित्यादौ द्रव्यभिन्नानुयोगिकस्वरूपसम्बन्धेन द्रव्यत्वाभावस्याभावो लक्षणघटको द्रव्यभिन्नानुयोगिकस्वरूपसम्बन्धोऽवच्छिन्ना या साध्याभावनिरूपिता प्रतियोगिता तत्र साध्यतावच्छेदकसंसर्गतावच्छेदकेतरद्रव्यभिन्नानुयोगित्वावच्छिन्नसंसर्गत्वनिरूपितत्वोभयसत्वात् किन्त्वभावान्तरमादायातिव्याप्तिरिति संगच्छते अत्र कल्पे घटत्ववान् तत्क्रियात्वादित्यत्र कालिकसम्बन्धेन साध्यत्वे तत्क्रियात्वस्य हेतुतायामव्याप्तिस्तत्र स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन स्वप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणहेत्वधिकरणवृत्त्यभावीयप्रतियोगितायां साध्यतावच्छेदकसम्बन्धनिवेशात् तादृशसम्बन्धेन प्रतियोगिव्यधिकरणाभावाप्रसिद्धेः न चैतत्क्रियासमानकालीनकालिकसम्बन्धावच्छिन्नप्रतियोगिताकघटाद्यभावमादाय नाव्याप्तिर्विभिन्नकालीनवस्तुनः कालिकसम्बन्धेनाधाराधेयभावाकल्पनादिति वाच्यं एतत्कालासमानकालीनपटाद्यभावस्य पूर्वक्षणवृत्तित्वविशिष्टपटाभावाभावाभावानतिरिक्ततया पूर्वक्षणवृत्तित्वविशिष्टपटाभावाभावरूपस्य प्रतियोगिनः कालिकेन सम्बन्धेन तत्क्रियायामधिकरणत्वसत्वेन प्रतियोगिव्यधिकरणाभा-

वाप्रसिद्धेः, अत्रोच्यते स्वप्रतियोगित्वं यादृशसम्बन्धावच्छिन्नं तादृशसम्बन्धेन तादृशसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वस्य हेत्वधिकरणे विवक्षितत्वात् एतत्कालासमानकालीनपटाद्यभावमादाय नाव्याप्तिः एतत्कालासमानकालीनपटाभावप्रतियोगी यः पूर्वक्षणवृत्तित्वविशिष्टपटाभावाभावस्तन्निष्ठप्रतियोगिताया स्तादृशकालिकसम्बन्धानवच्छिन्नत्वात् पूर्वक्षणवृत्तित्वविशिष्टैतत्क्रियासमानकालीनपटाभावनिष्ठकालिकसम्बन्धावच्छिन्नप्रतियोगिताकाभावस्तु न तत्क्रियाऽसमानकालीनपटाभावस्वरूपः किन्त्वतिरिक्त एवेति । एतेन संयोगादिसम्बन्धेन घटाद्यभावस्य विषयितासम्बन्धेन घटाद्यभावभिन्नभेदात्मकतया विषयितया घटाद्यभाववद्भिन्नवन्ह्यादिरूपप्रतियोगिसामानाधिकरण्यात् प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या वन्हिमान्धूमादित्यादावसम्भवतादवस्थ्यं हेत्वधिकरणवृत्तितावच्छेदकीभूतानुयोगितानिरूपितप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वविवक्षया कथंचित्तद्वारणेऽपि स्वरूपसम्बन्धेन स्वाधिकरणावृत्तित्वावच्छिन्नाभावस्वरूपतया घटाभावस्य स्वरूपसम्बन्धेन स्वाधिकरणावृत्तिवन्ह्यादिरूपप्रतियोगिसमानाधिकरणतया वन्हिमान् धूमादित्यादावव्याप्तिर्दुर्वारैवेत्यपि निरस्तं घटाद्यभावीयवन्ह्यादिनिष्ठप्रतियोगितायास्तादृशसम्बन्धानवच्छिन्नत्वादिति ध्येयम् ॥

प्राचां मते संयोगसामान्याभावसाध्यकमात्मत्वं विरुद्धमतः कपिसंयोगाभाव उक्तः वृक्षादावुत्पत्तिकालावच्छेदेन गुणसामान्याभावसत्वाद्वृक्षत्वादिकं परित्यज्यात्मत्वं हेतु रुक्तः इति जागदीशी अत्र यमाशङ्का न च कपिसंयोगवृक्षत्वान्य-

तराभावाभाववमादाय कपिसंयोगाभाववान्वृक्षत्वादित्यत्रा-
व्याप्तिसम्भवे कथं तत्परित्यक्तमिति वाच्यं वृक्षत्वकपिसं-
योगान्यतराभावाभावस्य वृक्षत्ववृक्षावृत्तिकपिसंयोगान्यतरा-
भावस्यवा हेतुसमानाधिकरणकपिसंयोगात्मकसाध्याभा-
वप्रतियोगितानवच्छेदकत्वात् न च तथापि संयोगस्वरू-
पाणां वृक्षावृत्तिकपिसंयोगवृक्षत्वान्यतररूपाभावानां प्रति-
योगितावच्छेदकीभूतवृक्षत्ववृत्ति कपिसंयोगवृक्षत्वान्यतरा-
भावत्वावच्छिन्नानधिकरणत्वात् वृक्षस्येति तद्दोषतादवस्थ्यं
न च कपिवृत्तिकपिसंयोगवृक्षत्वान्यतराभावाभावो वृक्षत्व-
रूप एवातिप्रसंगाभावादिति वाच्यं । कपिचरणं वृक्षत्व-
कपिसंयोगान्यतराभावाभाववदिति प्रतीत्यनुपपत्तेरिति वा-
च्यं यत्प्रतियोगित्वावच्छिन्नानधिकरणत्वं हेतुमति सम्भ-
वति तत्प्रतियोगितायां स्ववृत्तिपदार्थविभाजकीभूतधर्मान-
धिकरण प्रतियोगिताकाभाववृत्तित्वं निवेश्यं न च गु-
णसामान्याभावनिष्ठप्रतियोगित्वमपि न तादृशं विशिष्टस्या-
नतिरिक्ततया स्ववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणी-
भूतो यः पूर्वं चणवृत्तित्वविशिष्टगुणसामान्याभावाभावः
तत्प्रतियोगिताकाभाववृत्तित्वादिति वाच्यं निरुक्तप्रतियोगि-
तायां स्ववृत्तिपदार्थविभाजकीभूतधर्मानधिकरणवृत्त्यनुयो-
गिताऽनिरूपितत्वस्य विवक्षितत्वात् स्वपदं हेतुसमानाधि-
करणाभावपरं तथा च स्ववृत्तिपदार्थविभाजकीभूतं यद्-
गुणत्वं तदनधिकरणं यद्वृक्षत्वादि तत्तद्वृत्त्यनुयोगितानिरू-
पितत्वं अन्यतराभावनिष्ठप्रतियोगितायामस्त्येव तथाच
वृक्षत्वादिहेतौ अन्यतराभावाभावमादायैवाव्याप्त्यभावादा-
त्मत्वपर्यंतानुधावनमिति । आत्मत्वादिहेतुकस्थले गुणसा-

मान्याभावनिष्ठप्रतियोगितायां स्ववृत्तिपदार्थविभाजकीभू-
तगुणत्वानधिकरणवृत्त्यनुयोगित्वानधिकरणवृत्त्यनुयोगित्वा-
निरूपितत्वादित्यव्याप्तिः सुदृढैवेति ध्येयं ॥ अथ कपिसं-
योगप्रतियोगितावच्छेदकगुणसामान्याभावत्वमादाय कपि-
संयोगाभाववानात्मत्वादित्यादावव्याप्तिकथनमयुक्तं इति गु-
णसामान्याभावाभावस्य घटादिवृत्तिनानागुणस्वरूपकल्प-
नामपेक्ष्य घटादिवृत्तिएकत्वादिस्वरूपकल्पनायाः सुवच-
त्वाल्लाघवादिति । मैवं जन्यज्ञानविशिष्टैकत्वाभाववाना-
त्मत्वादित्यादौ जन्यज्ञानविशिष्टैकत्वस्वरूपसाध्याभावप्रति-
योगितावच्छेदकगुणसामान्याभावत्वावच्छिन्नानधिकरणत्वं
हेतुमत इति अव्याप्तिरितिचेज्जन्यज्ञानविशिष्टैकत्वस्व-
रूपकल्पनामपेक्ष्य लाघवाज्जन्यज्ञानस्वरूपत्वं कल्पनीयं अः
चेदं समाधानं कपिसंयोगाभाववानात्मत्वादित्यादौ त-
त्कपिसंयोगान्यतत्कपिवृत्ति गुणाभावत्वस्यापि संयोगरू-
पसाध्याभावप्रतियोगितावच्छेदकतया तदवच्छिन्नानधिक-
रणस्यात्मनि सत्वादव्याप्तिः सुसङ्गच्छते इति । नचैवं
तत्साध्यकवृक्षत्वादिहेतुकस्थले तत्कपिसंयोगान्यतत्कपिवृ-
त्तिसमवेतान्यसमवेताभावत्वस्यापि कपिसंयोगरूपसाध्याभा-
वप्रतियोगितावच्छेदकतया वृक्षादौ तदवच्छिन्नानधिक-
रणत्वस्य सत्वात् तत्राव्याप्तिवारणसम्भवे तदुपेक्षायां बी-
जाभावादिति वाच्यं संयोगान्यतराभावत्ववारणरीत्यैव त-
द्वारणादिति भाव्यं । अत्र च प्रतियोगितावच्छेदकध-
र्मेणावच्छिन्नत्वं साध्यतावच्छेदकताघटकसम्बन्धेन ग्रा-
ह्य तेनायःपिण्डस्यापि कालिकसम्बन्धेन यद्रूमत्वविशिष्ट-
त्वणादि तस्य संयोगेनाधिकरणत्वेऽपि नातिव्याप्तिरिति

Indira Gandhi National
Centre for the Arts

जागदीशो अथात्र साधनसमानाधिकरणाभावमात्रस्यैव का- लिकादिसम्बन्धेन प्रतियोगितावच्छेदकविशिष्टगुणादिस- मानाधिकरणत्वात् प्रतियोगिव्यधिकरणाभावाप्रसिद्धया स- मवायेन गुणवान्महाकालत्वादित्यादावव्याप्तिसम्भवे धूम- वान् वह्नेरित्यादावतिव्याप्त्यभिधानमसङ्गतमितिचेन्न ता- दात्म्येन गगनविशिष्टाभावमादायैव लक्षणसमन्वयात् के- नापि सम्बन्धेन स्वप्रतियोगितावच्छेदकीभूतगगनविशि- ष्टस्य महाकाले सम्बन्धित्वविरहात् न च साध्यतावच्छे- दकसमवायेन प्रतियोगिव्यधिकरणत्वाप्रसिद्धेरेव तादृशाभाव- स्य लक्षणाघटकत्वमिति वाच्यं महानसानुयोगिकसंयोगेन वह्नेः साध्यतायां तद्धूमादिहेतावव्याप्तिवारणाय प्रतियो- गिव्यधिकरणत्वस्य पारिभाषिकस्य ग्रन्थकृतैव प्रागुक्तत्वा- दिति धेयम् । स्वप्रतियोगितावच्छेदकधर्मे स्वाश्रयाधि- करणीभूतयन्निष्ठाधिकरणतानवच्छेदकत्वाधिकरणतावच्- छेदकत्व द्वयोर्व्यतिरेक स्वत्तद्वग्क्तिभेदकूटवत्वं हेतुमतो वा- च्यमिति जगदीशः । अत्र स्वाश्रयाधिकरणत्वं साध्यता- वच्छेदकसम्बन्धेन ग्राह्यं अन्यथा धूमवान्वह्नेरित्यादाव- तिव्याप्तिः कालिकसम्बन्धेन स्वाश्रयाधिकरणं यदयोगोल- कं तन्निष्टाधिकरणतानवच्छेदकत्वाधिकरणतावच्छेदक- त्वद्वयो र्व्यतिरेकस्य प्रतियोगितावच्छेदके सत्वात् तद्व्य- क्तिभेदवत्वस्य हेतुमत्यसत्वात्, एव मधिकरणतानवच्छेद- कत्वमित्यस्या धिकरणत्वं साध्यतावच्छेदकसम्बन्धेन ग्रा- ह्यं अन्यथा तज्ज्ञानान्यत्वविशिष्टसत्तावान्ज्ञानत्वादित्यादा- वतिव्याप्तिः स्वाश्रयाधिकरणं यत्तज्ज्ञानं तन्निष्टविषयिता- सम्बन्धावच्छिन्नाधिकरणतानवच्छेदकत्वाभावसत्वात् व्य

तिरिक्त स्तद्वारक्तिभेदकूटवत्वस्य हेतुमत्यसत्वात्, अत्रायं पू-
र्वपक्षः वन्हिप्रतियोगिकसंयोगसम्बन्धेन वन्हेः साध्यता-
यां धूमादिहेतावभावाप्रसिद्धाऽव्याप्तिः साध्याभावातिरि-
क्ताभावप्रतियोग्यधिकरणतायां साध्यतावच्छेदकसम्बन्धा-
वच्छिन्नत्वासिद्धेः साध्याभावप्रतियोगिव्यधिकरणतायां त-
त्सम्बन्धावच्छिन्नत्वाप्रसिद्धावपि साध्यतावच्छेदके स्वा-
श्रयाधिकरणस्वनिष्ठाधिकरणतानवच्छेदकत्व—अधिकरण-
तावच्छेदकत्वद्वयोर्व्यतिरेकस्तत्तद्वारक्तिभिन्नत्वस्य हेतुमत्य
सत्वादभावाप्रसिद्धेः एवं अधिकरणतानवच्छेदकत्वेत्यत्रा-
पि तथा । न च साध्यतावच्छेदकसम्बन्धातिरिक्तसम्ब-
न्धावच्छिन्नत्व—साध्यनिरूपितत्वोभयाभावत्वस्य स्वाश्रया-
धिकरणतायां निवेशान्नाप्रसिद्धिः एवमधिकरणतानवच्-
छेदकत्वमित्यत्रापीति वाच्यं प्रमेयमात्रसाध्यकधूमादिहे-
तावप्रसिद्धेः वन्ह्यभावातिरिक्ताभावप्रतियोग्यधिकरणतायां
साध्यतावच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वप्रमे-
यनिरूपितत्वद्वयोः सत्वाद्वन्हिप्रतियोगिकसंयोगसम्बन्धाव-
च्छिन्नवन्ह्यभावप्रतियोग्यधिकरणतायां तत्सत्वेऽपि तद्वारक्ति-
भिन्नत्वस्य हेतुमत्यसत्वादितिचेत् सत्यं साध्यतावच्छेदक-
सम्बन्धेन साध्याधिकरणवृत्तिसाध्यनिरूपितत्व—साध्यता-
वच्छेदकसम्बन्धातिरिक्तसम्बन्धावच्छिन्नत्वैतदुभयाभावस्य
विवक्षितत्वात् घटाद्यभावप्रतियोग्यधिकरणतायामेव साध्य-
तावच्छेदकसम्बन्धेन साध्याधिकरणवृत्ति साध्यनिरूपि-
तत्वोभयाभावसत्वादितिध्येयम् । अत एव च गोत्वत्वा-
द्यग्रहदशायां यत्र सास्नादिः सा गौरिति तादात्म्येन
गोर्व्यापकत्वग्रहे सास्नादिना तादात्म्येन गोस्तादात्म्येन

Indira Gandhi National
Centre for the Arts

गोर्व्यतिरेकाच्च सास्नादिव्यतिरेकः सिद्ध्यतीति दीधितिः । नन्वयं गौरित्यनुमितिर्गवेतरावृत्तित्वरूपायाः शुद्धगोत्वनिरूपितव्याप्तेर्ज्ञानात् निरवच्छिन्नगोत्वसाध्यकैव भविष्यति साध्यवदन्यावृत्तित्वरूपाया अपि व्याप्तेरनुमितिहेतुत्वस्याग्रे वाच्यत्वादतस्तादृशानुमित्यनुरोधात् धर्मिणो धर्मव्यापकत्वस्वीकारोऽनुचित इत्यत उक्तं गोत्वत्वेति । गोत्वत्वं गवेतरावृत्तित्वमिति जगदीशः । अथात्र समवायेन गोत्वसाध्यकस्थले सास्नादेर्गोरवयवत्वेन समवेतत्वसम्बन्धेनैव तस्य सद्धेतुत्वं तथा च गवेतरनिरूपितसमवेतत्वसम्बन्धावच्छिन्नवृत्तित्वाभावस्यैव तद्धेत्वीयव्याप्तितया गोत्वत्वघटकगवेतरासमवेतत्वस्य तद्धेतौ व्याप्तित्वकथनमनुचितं जगदीशस्येति चेन्न गोप्रतिपाद्यपृथिवीसाधरकसास्नादेः सद्धेतुतया तत्स्थलाभिप्रायेणैव तन्निवेशादिति, समवायेन रूपादिहेतुकस्थलाभिप्रायेण वा तल्लिखनादिति ध्येयं । न चैवं यद्यत्सम्बन्धेन यद्धर्मावच्छिन्नानधिकरणत्वं हेतुमतस्तत्सम्बंधान्यसाध्यतावच्छेदकसम्बन्धेन तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्याप्तिरस्तु तथा च घटवान्महाकालत्वादित्यादौ समवायेन घटाद्यभावोऽपि प्रतियोगिव्यधिकरणः सम्भवतीति वाच्यं, घटवृत्तित्वविशिष्टद्रव्यत्ववान् घटत्वादित्यादावव्याप्तेः केनापि सम्बन्धेन हेतुमतः साध्यतावच्छेदकावच्छिन्नानधिकरणत्वादिति, तादात्म्यसम्बन्धेन तथाविधानधिकरणत्वसम्भवेऽपि दधित्वविशिष्टप्रमेयवान् स्थूलदधित्वादित्यादावव्याप्तेरिति प्राहुरिति जगदीशः । ननु एतल्लक्षणस्य प्रतियोगिवैयधिकरणाभावाघटिततया घटाद्यभावोऽपि प्रतियोगिवैयधिकरण इति जगदीशग्रन्थासङ्गति-

Indira Gandhi National Centre for the Arts

रिति चेन्न । एतल्लक्षणस्य प्रतियोगिवैयधिकरणाभावघटितत्वे मूलाभिप्रेततया प्रतियोगिवैयधिकरणाभावघटितमेव लक्षणं वाच्यं तथा च यथा प्रतियोगिवैयधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकधर्मभिन्नत्वं साध्यतावच्छेदकधर्मे निवेश्य मूलोक्तलक्षणस्य परिष्कारो दीधितिकारेण कृतस्तथा स्वप्रतियोगितावच्छेदकसम्बंधेन प्रतियोगिव्यधिकरणहेतुमन्निष्ठसाध्यतावच्छेदकावच्छिन्नप्रतियोगितकाभावीयतत्तत्प्रतियोगितावच्छेदकसम्बन्धभिन्नत्वं साध्यतावच्छेदकसम्बन्धे निवेश्य लक्षणस्य परिष्कारः कर्तुं शक्यत इत्याशंकावताजगदीशेन घटाद्यभावोऽपि प्रतियोगिवैयधिकरण इत्यादिग्रन्थस्योक्तत्वादिति धेयम् । अथ हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिवैयधिकरणहेतुमन्निष्ठाभावीयसाध्यतावच्छेदकावच्छिन्नप्रतियोगितासामान्ये साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वाभाव इत्यादिक्रमेण निर्वचने घटवृत्तित्वविशिष्टद्रव्यत्ववान्घटत्वादित्यादौ तादात्म्येन साध्यभेदमादाय दोषवारणसम्भवेऽपि दधित्वविशिष्टप्रमेयवांस्थूलदधित्वादित्यादावव्याप्तिः केनापि सम्बन्धेन हेतुमतस्तत्र साध्यतावच्छेदकावच्छिन्नानधिकरणत्वासम्भवादिति जगदीशः । अत्र च दधित्ववैशिष्ट्यं सामानाधिकरण्यसम्बन्धेन, तच्च समवायेन दधित्वाधिकरणे समवायेन वृत्तित्वं तादृशप्रमेयं त्रसरेण्वादिस्वरूपं दधित्वादिकञ्च नतद्व्यणुकं परमाणौ दधित्वजात्यसत्त्वेन तत्र सामानाधिकरण्यसम्बन्धेन वैशिष्ट्यविरहात् न तदभावो हेत्वधिकरणे समवायेन नवा तादात्म्येन प्रतियोगिवैयधिकरण इत्यव्याप्तिः साध्यत्वंच तादात्म्येन बोध्यं समवायेन सा-

ध्यत्वे खलपदस्य व्यभिचारावारकत्वेन व्यर्थत्वात्तादात्म्येन
साध्यतायां तु खलपदानुक्तौ द्व्यणुके व्यभिचारापत्तेः तच्च
तादृशसाध्यस्य त्रसरेण्वादेः तादात्म्येनाभावात् । नच स-
मवायसम्बन्धेन साध्यत्वे किं स्थूलपदेनेति वाच्यं तथास-
त्यव्याप्त्यसम्भवेन प्रकृतानुपयोगात् द्व्यणुकरूपे हेत्वधिकर-
णे साध्यस्य तादात्म्यसम्बन्धेनाभावसत्वात् । अत्रेयमाश-
ङ्का विषयितासम्बन्धमादायविशिष्टप्रमेयत्वस्य हेत्वधिकरणे
सत्वेन प्रतियोगितावच्छेदकतत्तत्सम्बन्धान्यत्वस्य साध्यता-
वच्छेदकसम्बन्धे सत्वात्तत्राव्याप्तिविरहादितिचेन्न विषयि-
त्वादेः संसर्गत्वे मानाभावात् । केचित्तु ज्ञानत्वज्ञानान्य
तरस्य समवायेन साध्यतायां प्रतियोगिज्ञानत्वस्य समवा-
येन हेतुतायामव्याप्तिः तत्र केनापि सम्बन्धेनानधिकरण-
त्वविरहात् । न च यत्र महाकालानुयोगिककालिकसम्बन्धे-
नानधिकरणत्वान्नाव्याप्तिरिति वाच्यं विशेषरूपेण संस-
र्गतानभ्युपगमादिति तन्न दिक्कृतविशेषणतासम्बन्धेन सा-
ध्यानधिकरणत्वस्य ज्ञानादौ सत्वादिति ध्येयम् ॥

कालो घटवान्महाकालत्वादित्यादावव्याप्तिवारणाय साध्य
तावच्छेदकसम्बन्धसामान्ये यादृशप्रतियोगितावच्छेदकाव-
च्छिन्नप्रतियोगिकत्व हेत्वधिकरणयत्किञ्चिद्व्यक्त्यनुयोगिकत्वो-
भयाभावस्तादृशप्रतियोगितानवच्छेदकत्वं साध्यतावच्छे-
दके विवक्षितं उभयाभावत्वमपहाय विशिष्टाभावनिवेशे का-
लो घटवान्महाकालत्वादित्यादावव्याप्तिः गगनप्रतियोगिक-
त्वविशिष्टमहाकालानुयोगिकत्वाप्रसिद्ध्या गगनाभावस्य ल-
क्षणाघटकत्वादिति जगदीशः तन्न सङ्कुचत्कृते महाकालाभा-
वस्यैव लक्षणघटकत्वसम्भवात् तादात्म्यसम्बन्ध एव तादृश-

Indira Gandhi National
Centre for the Arts

महाकालानुयोगिकत्वविशिष्टमहाकालप्रतियोगिकत्वसम्भवात्, अत्र केचित् तादात्म्यकालिकान्यतरसम्बन्धेन साध्यतास्थले तावताऽपि अव्याप्तेरपरिहारादिति, न च प्रकृताव्याप्तितादवस्थ्यमिति जगदीशग्रन्थासङ्गतिरिति वाच्यं प्रकृतसाध्यहेतुकाव्याप्तिपरतया तत्संगतेरित्यलं पल्लवितेनेति वदन्ति। प्रतियोगिव्यधिकरणस्यानुगमस्तु हेत्वधिकरणवृत्तिप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके विवक्षणीयं, वृत्तित्वं च स्वावच्छेदकावच्छिन्नाधिकरणत्वसम्बन्धावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्त्वसम्बन्धेन बोध्यं ॥

इति जागदीश्यन्तर्गतसिद्धान्तलक्षणपत्रिका काशीशांकरी समाप्ता ॥ श्रीकृष्णार्पणमस्तु ॥

---

IGNCA RAR
ACC. No. R-622

Indira Gandhi National Centre for the Arts